M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 754

Title: Nyaya Kaustubha

754

न्यायकौस्तुभे   Incomplete

Nyāya Kaustubha	Title
	Author
	Editor
	Year, Vols.
	Publisher
754	Remarks

श्रीगणेशाय नमः [illegible] ॥ नत्वा सांबशिवं मुकुंदपितरं श्रीकंठसंज्ञं गुरुं न्यायरत्नमधि
याविभाव्य तदुक्त[illegible]समं[illegible]दि॥ शब्दे मानवरे विशिष्य विविधव्युत्पत्तिसंपादके गूढार्थप्रतिपत्तये वरधियां
कुर्वे प्रबंधं वरं [illegible]॥ अथ शब्दो निरूप्यते अत्रोपजीव्योपजीवकभावः संगत्योपमाननिरूपणानंतरं शब्दनिरू
पणमिति वहवो वदंति॥ तत्र यद्यपि ज्ञायमानशब्दस्य शाब्दबोधकरणत्वं प्राचीनमते स्वरूपतस्तस्यासं
भव॥ उपमानस्य शब्दानुपजीव्यत्वात्तथापि फलद्वारकः स संभवत्येव शाब्दबोधे शक्तिग्रहस्य तत्र चोपमान
स्य हेतुतया शक्तिग्रहद्वारा शाब्दबोधे उपमानस्योपजीव्यत्वात्॥ नन्वेवं सुपमितावतिदेशवाक्यार्थज्ञानात्म
कोपमानस्य हेतुतया तत्र चातिदेशवाक्यात्मकशब्दस्य हेतुतयोपमानद्वारेणोपमितौ शब्दस्यापि हेतुतया वि
परीतस्यापि तस्य संभवेन शब्दस्योपमाननिरूपणानंतरनिरूपणे नियामकत्वं न संभवतीति वाच्यं॥ यत्प्रमा
णफलसमानधर्मितावच्छेदकं सत् यत्प्रमाणफलं तदुपजीवकं भवति तत्तत्प्रमाणनिरूपणानंतरं निरू
पणविषय इति नियमस्यानंतरनिरूपणप्रयोजकत्वोपगमेन गवययो गवयपदवाच्य इत्याद्युपमितिसमान
धर्मितावच्छेदकस्य गवयोऽस्तीत्यादिवाक्यजन्यशाब्दबोधस्य तादृशोपमित्युपजीवकतया गोसदृशो गवय राम०
पदवाच्य इत्याद्यतिदेशवाक्यार्थज्ञानात्मकशाब्दबोधासमानधर्मितावच्छेदककगवयो गवयपदवाच्य इत्याद्यु १
पमितेस्तादृशशाब्दबोधानुपजीवकतया च विपरीतस्यासंभवेनादोषात्॥ वस्तुतस्तु॥ तत्फलधर्मिताव
च्छेदकताप्रयोज्यस्वफलधर्मितावच्छेदकताकत्वं प्रमाणस्य तत्प्रमाणानंतरनिरूपणप्रयोजकमित्युपगमान्न

शा॰ कौ॰ ष्टेप्र॰ शाब्दबोधधर्मितावच्छेदकतायाः शक्तिग्रहात्मकोपमितिधर्मितावच्छेदकतामात्रप्रयोज्यत्वात्॥ उपमिति॥
धर्मितावच्छेदकतायाश्चसादृश्यज्ञानधर्मितावच्छेदकतामात्रप्रयोज्यत्वेनातिदेशवाक्यार्थज्ञानात्मकशाब्दबोधध
१ र्मितावच्छेदकत्वाप्रयोज्यत्वात्॥ एतेनयत्प्रमाणफलेत्याद्युक्तनियमस्यानानंतर्यनिरूपणप्रयोजकत्वसंभवः
गोसदृशो गवयपदवाच्यः गवयोस्तीत्यादिस्मरणात्मकातिदेशवाक्यार्थज्ञानमादायोपमितेरपिशाब्दबो
धसमानधर्मितावच्छेदककत्वसंभवेनोक्तदोषस्यदुर्वारत्वादित्याशंकापिनिरस्ता॥ शब्दज्ञानस्यैवशाब्दबो
धकरणतावादिनवीनमतेचशक्तिग्रहात्मकोपमितेरेवशब्दप्रमाणतयोपमानोपजीवकत्वेन्वयस्वरूपतएवो
पजीव्योपजीवकभावः संभवतिनचोक्तरीत्या यथाशब्दस्योपमानोपजीवकत्वंतथातिदेशवाक्यार्थज्ञाना
त्मकोपमानस्याप्यतिदेशवाक्यज्ञानात्मकशब्दप्रमाणोपजीवकत्वेनतस्यानंतरनिरूपणप्रयोजकत्वासंभ
वइतिवाच्यं॥ यत्प्रमाणंस्वसमानविषयकप्रमाणोपजीवकंतत्तदनंतरंनिरूप्यमितिनियमोपगमेन
शब्दस्यस्वसमानविषयकोपमानोपजीवकतयोपमानस्यचस्वासमानविषयकशब्दोपजीवकतया॥ दोषा
त्नवस्वसमानविषयकत्वंयदियत्किंचिद्विषयमादायतत्रातिदेशवाक्यज्ञानात्मकशब्दस्योपमानविष राम
यीभूतगवय... विषयकत्वेनशब्देपितत्दुर्वारं यद्वियावद्विषयमादायतदोपमानेप्यसंभवितस्योपमि १
त्यात्मकशब्दवि... यत्वविशिष्टविषयकत्वादितिवाच्यं॥ मुख्यविशेष्यमादायतद्विवक्षणेनोप
मानस्योपमित्य... ख्यविशेष्यगवयविशेष्यकत्वेन अतिदेशवाक्यज्ञानात्मकशब्दस्यचोपमा

...विशेष्यकत्वेनोक्तदोषाभावात्॥ यत्तुएवमपिउपमानजनकस्यसदृशांसदृशपदश
...मित्या... विशिष्टरूपस्यशाब्दधीकरणतयाशब्दप्रमाणस्योपमानमुख्यविशेष्यकगवयव्यक्तिमुख्यवि
शेष्यक... न्वार्थेनापिस्वसमानमुख्यविशेष्यकशब्दोपजीवकत्वान्नोक्तरीत्यानिर्वाहइति। तदसत् विशे
ष्यता... तदर्थं मप्रकारतानिरूपितत्वांशनिवेशेनसामंजस्यात्॥ यत्तुमानतावच्छेदकधर्मावच्छिन्नोप
जीव्यतानिरूपितमुपजीवकत्वमानंतर्याभिधाने नियामकं द्राक्लिपरिच्छित्तिरेवोपमानफलंनतुकारण
तापरिच्छित्तिरपीतुपमानमात्रस्यैवशब्दोपजीव्यताशब्दमात्रस्यैवनोपमानोपजीव्यत्वंघटोस्तीत्यादौव्यभि
चारादितिनकोपिविशेषइति॥ तन्न॥ कारणतावच्छित्तेरप्युपमानफलत्वस्योपमानपरिच्छेदेव्यवस्था
पनात्॥ वस्तुतस्त्वनुमानपरिच्छेदेसंगतेरनंतराभिधानाव्याप्यत्वस्यानंतराभिधानव्यापकत्वस्यच
व्यवस्थापनेनसंगतेरुभयत्राविशेषेपिनक्षतिः॥ अनंतराभिधाननियामकश्चोद्देशक्रमएव यत्तुउद्दे
शक्रमेपिसंगतिरेवबीजमितितदसत्॥ उक्तक्रमेणसंगतेस्तद्बीजत्वासंभवेनसर्वतंत्रेस्वस्येतिन्यायेनेच्छा
याएवतन्नियामकत्वादित्येवतत्त्वं तत्राप्तोपदेशः शब्दः अत्राप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान्
तस्योपदेशः तज्जन्योपदेशः विशिष्टजन्यत्वंचविशेष्यस्याव्यावर्त्तकतया विशेषणजन्यत्वपर्यवसन्नं
तथाच प्रकृतवाक्यार्थयथार्थज्ञानजन्यशब्दत्वंलक्षणंफलितं॥ अतएवैतदनुसारिणामणिकृतापि
प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यःशब्दःप्रमाणमित्युक्तं अस्यार्थः॥ प्रयोगहेतुभूतंपदार्थतत्त्वज्ञानंप्र

न० गु० कौ० आकृपार्थज्ञाने प्रकृतवाक्यार्थयथार्थज्ञानं तज्जन्यत्वं तथा चोक्त एवार्थः अत्र वक्तृबुबोधयिषापूर्वकवाक्यत्वा
१ वच्छिन्ने वक्तृवाक्यार्थयथार्थज्ञानस्य हेतुत्वमिति प्राञ्चां मते पयसा सिंचतीत्यादौ वक्तृपदार्थवाक्यार्थज्ञान
जन्यत्वालक्षणसमन्वयः वह्निना सिंचतीत्यादौ तु वाक्यार्थज्ञानस्यायथार्थत्वान्नातिप्रसंगः प्रत्येकपदार्था
वांतरवाक्यार्थतत्वज्ञानजन्यत्वमादायोक्तातिप्रसंगतादवस्थ्यवारणाय भूतांतं ज्ञानविशेषणं महावाक्या
र्थभ्रममादायातिप्रसंगवारणाय तत्वपदं॥ नन्वेवमपि वह्निना सिंचतीत्यादौ प्रत्येकपदार्थावांतरवाक्या
र्थज्ञानयोर्यथार्थत्वेन वाक्यार्थमहावाक्यार्थज्ञानद्वारा तज्जन्यत्वमादायातिप्रसंगोऽप्रवृत्तिर्वाच्यं॥ एतद स्येद
र्थमेव भूतांतस्योपादानात् तदुपादाने च भूतप्रामाविति धात्वर्थानुसारेण तरासहकारेण प्रयोगहेतुता
र्थमेव भूतांतस्योपादानात् तदुपादाने च भूतप्राप्ताविति धात्वर्थानुसारेण इतरासहकारेण प्रयोगहेतुता
दृश ज्ञानजन्यत्वलाभेनोक्तज्ञानयोर्वाक्यार्थमहावाक्यार्थज्ञानसहकारेणैव प्रकृतवाक्यहेतुतया ज्ञानिष्ठ
संगात्। यत्त्वेवं पयसा सिंचतीत्यादावसंभवः तत्रापि स्वपूर्वोत्पन्नप्रत्येकपदार्थावांतरवाक्यार्थज्ञान
सहकारेणैव महावाक्यार्थतत्वज्ञानस्य प्रयोगहेतुत्वादिति स्वोत्तरोत्पन्नेतरासहकारेणेति वाच्यमिति
तदसत्॥ य[illegible]तिमहभावाकार्याभावस्तस्यैव तस्य सहकारितया स्वजनकस्वपूर्वोत्पन्नस्य स्वस
हकारित्वा[illegible]भावात्॥ वस्तुतस्तु घटः कर्मत्वमानयनं कृतिरित्यादिस्वरूपायोग्यनिरा राम
[illegible]दवि[illegible]रस्वैकान पुनाहिरूपविषये प्रामाण्यवारणाय प्रयोगहेतुभूतत्वे ज्ञानविशेषणं त २
ज्ञान[illegible]मत्प[illegible]रूलं संबंधश्च विषयतेति स्वजन्यज्ञानसमानविषयकत्वं पर्यवसन्नं। त

[illegible] वाक्यार्थप्रमाजन्यत्वं निराकांक्षादिव्यावृत्तं लक्षणार्थः। फलितः॥ यत्तु व
[illegible] विशे[illegible]
[illegible] मौचित्येन्यप्रतिस्वरूपयोग्यतया शाब्दप्रमास्वरूपयोग्यमात्रस्य लक्ष्यतया निराकांक्षादेरपिल
क्ष्यतया तु हा[illegible] पदार्थकतया नोक्तविशेषणसार्थक्यं॥ नन्वेवमपि ध्वन्यात्मकशब्दवारणाय तत्तदावश्यकमिति
वाच्यं॥ शाब्दस्य नैवर्णत्वं निवेश्यैव तद्वारणसंभवात्। वर्णत्वं जातेः सुखत्वादिजातिवद्ग्राह्यमाणिकत
याधादत्वेनैव शाब्दप्रमास्वरूपयोग्यतया ध्वनेरपि लक्ष्यत्वस्य समुचितत्वाच्चेति॥ तदसत्॥ घटः कर्म
त्वमित्यादिनिराकांक्षवाक्यस्य शाब्दत्वरूपेण घटकर्मत्वादिविषयकप्रमास्वरूपयोग्यत्वेपि प्रमात्वनिय
तधर्मावच्छिन्नतत्तदर्थविषयकप्रमानिष्ठकार्यतानिरूपितस्वरूपयोग्यताया एव लक्ष्यतावच्छेदककोटि
प्रविष्टत्वात् तदर्थघटितप्रमाणत्वरूपतया निराकांक्षादेरलक्ष्यतया तद्वारकविशेषणस्यावश्यकत्वात् यद
पि घटः कर्मत्वमित्यादिवाक्यस्य प्रमात्वनियतकर्मत्वादिविषयकघटादिप्रकारकशाब्दबुद्धित्वावच्छि
न्नप्रतिस्वरूपयोग्यत्वात् लक्ष्यत्वमेवेति तदप्यसत्॥ तत्तदर्थबोधे परस्परसाकांक्षत्वतदर्थस्यापक
पदत्वेनैव स्वरूपयोग्यत्वात्। ननु नन्वन्यथा केवक्तृवाक्यार्थज्ञानस्य हेतुतयोक्तलक्षणसंभवस्तथा
हि वाक्यत्वस्य जन्यतावच्छेदकत्वे शुकादिवाक्ये व्यभिचारः॥ न च वक्तृवाक्यार्थबुबोधयिषापूर्वकवाक्य
त्वस्य वक्तृवाक्यार्थयथार्थज्ञानजन्यतावच्छेदकत्वान्न दोष इति वाच्यं॥ तथापि शुकादिवाक्यस्य लक्ष्यस्या
वाक्यार्थज्ञानाघटितसामग्र्यैवोक्तवाक्यस्यापि निर्वाहे तत्र वक्तृवाक्यार्थयथार्थज्ञानस्यान्यथासिद्धेर्दुर्वा
ग्यै

नु॰

मा॰क्रा॰ स्त्वात्। क्रमोत्पन्नवर्णसमुदायपर्याप्तवाक्यविशेषज्ञानसंबंधावच्छिन्नत्वावच्छिन्नस्य। विदथिल्लक्षणे ऽकत्यत्वा
१२ वाक्यत्वस्य जन्यतावच्छेदकत्वासंभवादिति चेन्न॥ लक्षणस्य जन्यपदस्य प्रयोज्यपरतया वाक्यार्थज्ञानस्य
वाक्यहेतुत्वात्तावेपितस्य प्रयोजकत्वेनानुपपत्त्यभावात्॥ यत्तु खलत्वस्याननुगमेन लक्षणमननुगतमिति
दोषोद्भावनं। तदसत्॥ प्रमात्वघटितलक्षणस्याप्यननुगमेन लक्षणाननुगमस्यादोषत्वात्॥ यदि च॥
प्रसक्तपरिच्छेदोक्तरीत्या प्रमात्वमनुगतमेवेति विभाव्यते तथापि ननु शक्तिः स्वजन्यज्ञानसमानविषय
कस्यार्थप्रमाप्रयोज्यत्वसंबंधेन वाक्यविशिष्टशब्दत्वस्य किंचिद्धर्मविशिष्टशब्दत्वस्यैव वानुगतस्य ल
क्षणत्वसंभवात्। लक्ष्यतावच्छेदकं चात्र प्रमाणशब्दत्वं॥ प्रत्यक्षादावव्याप्तिवारणाय शब्दत्वनिवेशः
एवं च संस्कारादावतिप्रसंगवारणाय लक्षणे शब्दत्वनिवेशः। न चात्रैकस्यैव शब्दपदस्य सत्त्वात्कथं लक्ष
लक्षणयोः शब्दत्वलाभ इति वाच्यं॥ शब्दपदांतरपूरणेन तल्लाभसंभवात्॥ यत्तु काकादिगोलकस्या
येन च अस्य शब्दपदस्योभयत्र संबंधेनैव तल्लाभे पूरणमनर्थकमिति॥ तदसत्॥ उद्देश्यविधेययोरप्यस्या
पकपदयोः [illegible]पर्यरूपाकांक्षायाः उद्देश्यविधेयभावप्रयोजकतया एकपदोपस्थाप्यशब्दत्वस्योभय
प्रसंबंधा[illegible]त्व॥ यत्तु प्रयोगहेतुभूतत्वं न ज्ञानविशेषणं किंतु उक्तातिप्रसंगवारणाय स्वीतित्रे ३
[illegible]विशिष्टवि[illegible]शब्दस्य च प्र[illegible]तवाक्यार्थपरतया न वक्तिनेत्याद्यावतिप्रसंग। न च प्रयोगसामग्रीसह
मान[illegible]मस्य [illegible] सहकार्यसहकारिभावसंबंधरूपप्रासेरेवात्र विवक्षणात्॥ सेयाच॥
न

श॰

[illegible]तेन शब्दसामग्रीजन्यत्वं लक्षणं तच्च न संस्कारादावितिनातिप्रसंग इति लक्ष
[illegible]विष्वपि स्युक्तं मिश्रैस्तत्क्लिष्टं॥ लघुभूतशब्दत्वनिवेशेनैवोपपत्तौ शब्दसामग्रीजन्यत्वस्य गु
[illegible] आनर्थक्यात्॥ नवीनास्तु शब्दो गुणरूपत्वादिप्रत्यक्षकरणस्य तादृशार्थबोधोपयिकाकांक्षादिसहि
तस्य [illegible]स्य वारणाय प्रमासामान्यबोधकशब्दस्य शाब्दप्रमारूपविशेषपरतया आवश्यकत्वाच्छाब्दप्र
माकरणत्वरूपलक्ष्यतावच्छेदकस्याभासंभवे लक्ष्यतावच्छेदकको शब्दपदांतरपूरणं विनैवास्य लक्षणादि
त्वाच्च तल्लक्ष्यतावच्छेदकत्वाभासंभव इति लक्षणे एव शब्दत्वनिवेशो न तु लक्ष्येपीति प्राहुः॥ अत्र ज्ञापमा
न शाब्दस्य करणतामते तादृशशब्दत्वमेव लक्षणं शब्दज्ञानस्य करणतामते तादृशशब्दज्ञानत्वं लक्षणं बो
ध्यं॥ एवं लक्ष्यतावच्छेदकमपि प्रमाणं शब्दत्वं प्रमाणं शब्दज्ञानत्वं वा मतभेदेन बोध्यं॥ मूल॥ आप्तोप
देशः शब्दः॥ आप्नोति स्वप्रकारं विशेष्यतया ख्याति आप्नोतीति आप्तः यथार्थः। उपदेशः शाब्दबोधः तथा च। ३१५
स यस्मादिति विग्रहेप्येतादृशबोधकरणत्वं शाब्दप्रमाकरणत्वपर्यवसन्नं लक्षणं॥ प्रयोगहेतुभूतेत्या
दिमतिः कार्योक्तस्याप्युक्त एवार्थः॥ प्रयोगो हेतुर्भूतो यस्यार्थतत्त्वज्ञानस्येति समासात् ज्ञानांतं शाब्द
प्रमापरं तदेव जन्यं यस्येति बहुव्रीहि[illegible]तराश्रयणेन शाब्दप्रमाकरणत्वं समुदितलक्षणवाक्यार्थः प्रत्यक्षा
दिप्रमाणातिप्रसंगवारणाय प्रमायां शब्दत्वनिवेशः शब्दपदस्य च लक्ष्यतावच्छेदके एव निवेशः लक्ष
णे योर्न भेदः। शाब्दत्वं शाब्दस्य मीत्यनुभवसिद्धो जातिविशेषः॥ यत्तु आप्तो यथार्थः। उपदेशः॥

शब्दज्ञानजन्यत्वव्याप्यशब्दविषयकवृत्तिजातिमान्बोधः शब्दाविषयकेत्युपमितिवारणाय सत्यस्मात्
इति विग्रहः तथा च तादृशबोधकरणत्वमेव लक्षणमिति ॥ तदसत् ॥ गौरवात् ॥ उपदर्शितरीत्या कारण
ताव च्छिन्नस्योपमितित्वेनोपमितिवारणासंभवाच्च ॥ एतेन जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वा
व्यापकजातिमत्त्वे सति पदविषयकत्वव्यभिचारिजातिमदनुभवत्वं ॥ शाब्दत्वं तदवच्छिन्नप्रमाकरणं
त्वं लक्षणं सत्त्वमनुमित्यादिवारणाय उपमितिवारणाय जातिमदित्यंतं ॥ सत्तादिकमादायासंभववारणा
य सत्यंते ऽनुभवत्वाव्यापकेति अनुमितित्वस्यापि ईश्वरीयपदज्ञानजन्यत्वाव्यभिचारेण तत्प्रसंगवारणा
य जन्येतीत्यपि परास्तं ॥ जन्यपदज्ञानजन्यत्वाव्यभिचारिजातिमत्त्वेनैवानुमित्यादिवारणे शब्दत्वांतनिवेशे
गौरवाच्च ॥ किं चानुमितौ ज्ञानत्वेनैव लिंगज्ञानस्य करणतया जन्यपदज्ञानस्य ज्ञानत्वेनानुमितौ स्वरूपयो
ग्यतया शब्दत्वांतनिवेशेऽप्यनुमितिवारणासंभव ॥ न च जन्यपदज्ञानत्वेन तज्जन्यत्वनिवेशान्नोक्तदोष इ
ति वाच्यं ॥ तथा सति शाब्दबोधेऽपि वर्णज्ञानत्वेन ज्ञानत्वेनैव यद् ज्ञानस्य करणतया शाब्दत्वस्यापि जन्य
पदविशिष्टबुद्धिनिष्ठतादृशजन्यत्वव्यभिचारेणासंभवात् ॥ अपि च परोक्षत्वजातेरपि जन्यपदधीजन्य
त्वाव्यभिचार्यनुभवत्वाव्यापकत्वेन शाब्दबोधे तच्छून्यत्वाभावादसंभवः ॥ न च परोक्षत्वजातिरेव प्रामाणि
के ति वाच्यं ॥ बाधाभावादिजन्यतावच्छेदकतया तत्सिद्धेः ॥ अन्यथानुमितित्व शाब्दत्वादीनां तत्प्रतिबध्य
तावच्छेदकत्वेनैककारणतापत्तेः ॥ न चानुभवत्वेन सांकर्यान्न परोक्षत्वं जातिरिति वाच्यं ॥ प्रत्यक्षत्वाति
[illegible] घटजा[illegible] मातानुभवात् ॥ अयं वह्न्याद्यनुमित्सा विशिष्टवह्न्याद्यनुमितिसामग्र्याः घटत्व
ज्ञान[illegible]प्रतिब[illegible]याप्रत्यक्षत्वादेस्तत्प्रतिबंधतावच्छेदकत्वगौरवेणानुमित्यन्यप्रत्यक्षशाब्द

[illegible] प्रत्यक्षनिवे[illegible] शसामग्र्यभावजन्यतावच्छेदकत्वमुपपत्तेर्तादृशवैजात्येन सांकर्यान्न परो
[illegible] तादृशवैजात्यस्येश्वरज्ञानवृत्तित्वान्नित्यसाधारण्येन जन्यतावच्छेदकत्वासंभवा
[illegible] ज्ञानमात्रवृत्तिमेव तदुपेयं इति वाच्यं तथा सति प्रत्यक्षत्वजातिसांकर्येणैवैजात्यस्यैवासिद्धि
प्रसंगात् ॥ न च नित्यसाधारण्येऽपि कार्यतावच्छेदकत्वे बाधकाभाव इति वाच्यं ॥ बोधकस्यान्यत्रास्मा
भिर्विस्तरेण प्रपंचितत्वात् ॥ यत्तु ॥ नव्यैरुक्तं शब्देच्छाविशिष्टशाब्दसामग्रीकाले समानविषयकोपनी
तज्ञानस्यानुमितेश्चानुदयेन तत्कारणाय प्रतिबंधकताद्वयमपेक्ष्य लाघवेन प्रत्यक्षानुमितिसाधारणीमे
कां जातिं स्वीकृत्य तदवच्छिन्नं प्रतित्तस्या एकमेव प्रतिबंधकत्वं कल्प्यते ॥ लाघवात् ॥ एवं च तादृशजा
त्या सांकर्येण परोक्षत्वस्य जातित्वं न संभवतीति ॥ तदसत् ॥ वह्निमान्पर्वतो घटवानित्याद्यनुमितौ व्य
भिचारवारणाय पर्वतोद्देश्यतानिरूपितवह्न्यादिविधेयतया एवानुमितिस्थलीयतादृशसामग्रीप्रतिबध्य
तावच्छेदकतया विधेयताया अप्रत्यक्षत्वात्तया प्रत्यक्षस्थले स्वतंत्रप्रतिबंधकत्वस्यावश्यकतया तादृशजा
तौ मानाभावात् ॥ न चैतदनुरोधेन विधेयताया प्रत्यक्षसाधारण्योपगमान्न दोष इति वाच्यं ॥ परामर्शादिनि
यम्यायास्तस्याः प्रत्यक्षसाधारण्यस्य सिद्धांतविरुद्धत्वात् ॥ न च वह्निशाब्दच्छा विशिष्टवह्निशाब्दसामग्रीका
ले वह्निमान्पर्वतो घटवानित्याद्यनुमितेरप्यनंगीकारान्नोक्तव्यभिचार इति वाच्यं ॥ भिन्नविषये नु मितिसाम
ग्र्या बलवत्त्वस्य सिद्धांतासिद्धतया तादृशानंगीकारासंभवादित्यलेप पल्लवेन ॥ ननु शब्दे न प्रमाणं तस्य तत्वे
मानाभावात् ॥ न चैवं शब्दश्रवणानंतरं शाब्दबोधासिद्धा पक्षसाधनुपपत्तिरिति वाच्यं ॥ पदार्थोपस्थितापि

श॰ कौ॰
५
दार्थानां संसर्गावगाहिमानसोपनीतभानेनैव तदुपपत्तेरिति चेन्न ॥ शाब्दयामीत्याकारकशाब्दत्वावच्छिन्ना
वगाहिहि सर्वसिद्धानुव्यवसायेन शाब्दत्वजातिसिद्धौ तदवच्छिन्नकरणतया शब्दस्य प्रमाणत्वावश्यकत्वात्
अयोक्तानुव्यवसायबलाच्छाब्दत्वसिद्धावपि तस्य मानसत्वव्याप्यत्वोपगमेन तदवच्छिन्नकरणस्य शब्दस्य प्र
त्यक्षप्रमाणत्वमेव । ननु शाब्दत्वस्य मानसत्वव्याप्यत्वेपि पदजन्यपदार्थोपस्थित्यादिरूपकाले तदवच्छिन्नो
पत्तिवारणाय तदवच्छिन्नं प्रति पदजन्यपदार्थोपस्थित्यादेर्हेतुत्वस्यावश्यकत्वे शाब्दत्वस्य मानसत्वव्याप्यत्वे
मानाभाव इति वाच्यं ॥ शाब्दत्वस्य मानसत्वविरुद्धत्वे शाब्दसामग्रीकाले मानसवारणाय मानसत्वावच्छि
न्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयं शाब्दत्वस्य मानसत्वव्याप्यत्वमते तु तदा मानसोत्पत्त्याविरो
धत्वात् तद्कल्पनेन लाघवमिति लाघवेन शाब्दत्वस्य मानसत्वव्याप्यत्वसिद्धेर्दुर्वारत्वादिति चेन्न । भिन्नवि
षयकत्वाद्दृष्टादिसामग्रीकाले शाब्दान्यमानसवारणाय तत्र तादृशसामग्र्याः प्रतिबन्धकत्वस्य सर्वसिद्ध
तया शाब्दत्वस्य मानसत्वव्याप्यत्वे तादृशसामग्रीकाले शाब्दबोधानुपपत्त्या तादृशसामग्र्याः शाब्दान्यमान
सत्वमेव प्रतिबध्यतावच्छेदकं वाच्यमिति तत्र शाब्दान्यत्वनिवेशप्रयुक्तगौरवस्य तस्य मानसत्वस्य च मिथो
विरोधाविशेषणाभावे विनिगमनाविरहप्रयुक्तप्रतिबन्धकताधिक्यप्रयुक्तगौरवस्य च दुर्वारत्वात् ॥ एते
न [illegible] मानसं प्रति शाब्दसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमपि परास्तं भिन्नविषयकत्वाद्दृ
[illegible] मानसरूपकारणबलात् शाब्दसामग्रीकाले शाब्दान्यमानसवारणाय शाब्दाप्रमाणसत्वावि
मान [illegible] प्रतिबन्धकताकल्पनस्यावश्यकत्वात् ॥ परं तु तत्प्रतिबध्यतावच्छेदककोटौ शाब्द
राम
५

[illegible] स्यनिवेशाद्विपरीतमेव गौरवं ॥ अधिकं अनुमानप्रामाण्यव्यवस्थापनोक्तरीत्यानुसंधेयमिति
[illegible] विशेषिकाः ॥ शब्दस्य प्रमाणत्वसिद्धावपि न प्रमाणान्तरत्वं ॥ अनुमान एवांतर्भावसंभवात् ॥ तथा
हि दण्डमानयेत्यादिपदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि ॥ आकांक्षादिमत्पदकदंब
त्वात् । पदमानयेत्यादिपदकदंबवदित्यनुमानेन संसर्गज्ञानसिद्धौ ज्ञानावच्छेदकतया पदार्थसंसर्गसिद्धिः
संभवतीति शब्दो न पृथक्प्रमाणं । अथ रजतज्ञानवानयमिति ज्ञानात् प्रवृत्तिवारणाय पुरोवर्त्तिविशेष्यकं
स्यतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तकतया प्रवर्त्तकज्ञानं नानुमानात् सिध्यतीति प्रवर्त्तकज्ञानसंपत्त्यर्थं
शब्दप्रामाण्यमावश्यकं । ननु पुरोवर्त्ति निरजतानयनार्थिप्रवृत्तौ परोद्देशज्ञानस्यनोपादानप्रसंगविधया
नन्वेष्टसाधनत्वकृतिसाध्यत्वज्ञानविधया हेतुत्वेन प्रवृत्त्यनुरोधेन शब्दप्रामाण्यमिति वाच्यं ॥ रजता
नयनमिष्टसाधनं कृतिसाध्यं चेति ज्ञानस्येष्टत्वेन पुरोवर्त्तिरूपोपादानप्रत्यक्षस्य च सत्वेपि पुरोवर्त्ति निर
जतत्वविपरीतज्ञानदशायां नरजतानयनार्थिप्रवृत्तिरपि तु शब्दादिना तत्र रजतत्वनिश्चये सत्येवेत्यनुभवा
नुसारेण तज्ज्ञानस्यापि तत्र स्वातंत्र्येण हेतुत्वात् ॥ नन्वेवमपि न प्रवर्त्तकज्ञानसंपत्तिः इदं रजतमिति शब्दज
न्यज्ञानस्य रजतप्रकारकत्वादिति वाच्यं ॥ तत्र रजतविशेषणतापन्नस्य रजतत्वस्यापि धर्मिविशेषणतया
भानोपगमेन सामंजस्यादिति चेन्न ॥ लाघवेनात्र रजतत्वमिति ज्ञानस्य प्रवर्त्तकत्वानुरोधेन च पुरोवर्त्ती
स्यतावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव प्रवर्त्तकतया सा धर्म्यज्ञानपदस्य प्रमापरत्वेन प्रमात्वघटकत

न्या. कौ.
६६

याप्रकृतेतस्याप्यज्ञातत्वात्॥नचानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेनानुमानात्तस्मारित
पदार्थत्वेनैवरजतादिसंसर्गः सिद्धोनतुरजतत्वादिनातत्संसर्गइतितत्सिद्ध्यर्थंशब्दप्रामाण्यमावश्य
कमितिवाच्यं।रजतादिपदश्रवणेनरजतत्वादिनारजतादिरूपस्थितावितरबाधबलाद्विशेषरूपेणानुमि
तौमानसंभवात्लाघवज्ञानेतरबाधसत्वेव्यापकतानवच्छेदकरूपेणापिव्यापकज्ञानजन्यानुमितेर्धर्मि
तःसाध्यस्यसर्वसिद्धत्वात्।यद्वा।रजतादिपदश्रवणेनरजताद्युपस्थितौएतद्वाक्यघटकपदस्मारिता
रजतानन्वयिताः पदार्थाएतद्वाक्यतात्पर्यविषयमिथःसंसर्गवंतःआकांक्षादिमदेतद्वाक्यघटकपद
न१ स्मारितत्वात्घटेजलमाहरेत्यादिवाक्यघटकपदस्मारितार्थवदित्यनुमानाद्विशेषरूपेणसंसर्गसि
द्धिः।यत्तु।शाब्दबोधेघटकर्मत्वाधेयोराधाराधेयभावादिःसंसर्गमर्यादयाभासतइतिसंसर्गतास्यविल
क्षणविषयताशालित्वंतस्यानुमितौतुपदार्थस्यसंसर्गविशेषणतयैवसाध्यघटकतयासंबंधस्यवि
शेषणतयानतादृशविषयताशालित्वमितिशाब्दबोधस्यानुमितिवैलक्षण्येनविलक्षणप्रतीतिनिर्वा
हायशब्दप्रामाण्यमावश्यकमिति॥तदसत्॥यत्रधर्मिणिअर्थयादृशसंबंधेनयदर्थप्रकारकप्रतीति राम ६६
र्व्युत्पादिकानामभिमताविशिष्यतस्मिन्नर्थेतादृशसंबंधेनतत्साधकानुमितेरुपगमेनादोषात्॥
अयंवापद्दर्शितरीत्याचैत्रोघटमानयतीत्यादौकर्मत्वानयनकृतिचैत्रेषुआधेयत्वनिरूपकत्वानुकूलत्वा
श्रयत्वसंसर्गेघटकर्मत्वानयनकृतीनांसमूहालंबनानुमितिःकर्मत्वंघटीयमानयतेसकर्मकंकृतिरा
नयनीयाचैत्रःकृतिमानित्याकारिकायाःसंभवेपिघटकर्मकानयनानुकूलकृतिमांश्चैत्रइत्याकारक

विशिष्टवाक्यार्थबोधासंभवेनतादृशवाक्यार्थबोधायशब्दस्यप्रमाणांतरत्वमावश्यकमितिचेन्न।तत्रखले
कपोतन्यायेनविशेष्येविशेषणमितिरीत्यातादृशवाक्यार्थबोधोपगमेप्यपिघटकर्मत्वानयनकृतिचैत्राणां
६ समूहालंबनोपस्थित्युत्तरंत्वेवविशेष्येविशेषणमितिरीत्याचैत्रेघटकर्मकानयनकृत्युपल्लमिते।राजपुरुष
वदन्यायेनविशिष्टस्यवैशिष्ट्यमितिरीत्यातदुपगमेचप्रथमंकर्मताघटीयास्त्यनुमितेस्ततआनयनंघट
कर्मकंतत्कृतिर्घटकर्मकानयनवतीततश्चैत्रोघटकर्मकानयनानुकूलकृतिमानित्यनुमितेरुपगमेनादोषा
त्।यत्तु।घटमानयेत्यादौकर्मत्वादवाधेयतासंबंधेनघटाद्यनुमितिर्नसंभवतिएवंघटःरोनास्तीत्यादाव
भावेऽनुयोगितयाघटादेरनुमितिर्नसंभवतिवृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतया
तत्संबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धातत्संबंधस्यव्यापकताघटकतयातेनसंबंधेनकर्मत्वादौघटादे
र्नानुमानसंभवेनशब्दस्यप्रमाणांतरत्वमावश्यकमिति॥तन्न।वृत्त्यनियामकसंबंधस्यप्रतियोगितानवच्छे
दकत्वेपिसाध्यतावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यघटितव्याप्तौतत्संबंधावच्छिन्नप्रतियोगिताया
अप्रवेशेनवृत्त्यनियामकसंबंधस्यापिव्यापकताघटकत्वसंभवात्।वृत्त्यनियामकसंबंधस्याप्यभावप्र
तियोगितावच्छेदकत्वेबाधकाभावेनसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशेपितस्यव्यापक
ताघटकत्वसंभवाच्च॥अथघटादन्यइत्यादौपाश्चात्यैकदेशपदार्थविशेषणतापत्तेरन्यत्वादेपदार्थत्वात्
प्रतियोगिकत्वादेर्भानंनिरुक्तानुमानान्निर्वहतीतिअनुमितौपदार्थस्यमुख्यविशेष्यतयैवभानात्।नचान्यत्वादि
रूपपदार्थस्यधर्मिणिविशेषणतयानभानं।धर्मिपक्षकतत्साधकानुमानांतरादेवशाब्दबोधसमानाकार

न्या॰ कौ॰ रानुमितिनिर्वाह इतिवाच्यं ॥ शाब्दधर्मिणि अन्यत्वादेर्निर्धर्मितावच्छेदकस्य भानात् अनुमानस्य च पक्षताव
८ च्छेदकावच्छिन्न एव साध्यभासकत्वात्तत्तादृशभानानिर्वाहादिति चेन्न ॥ एकदेशे पदार्थान्तरान्वयस्याव्यु
नभ्युपगमेन घटादन्य इत्यादौ अन्यत्वादिविशिष्ट एवान्यत्वादिघटितसंबंधेन घटप्रतियोगिकत्वादेरन्व
योपगमेन धर्मिविशेषणतापन्नेन्यत्वादौ साक्षात्संबंधेन तत्प्रकारकभानस्यानभ्युपगमात् ॥ यत्तु मणि
कारानुसारिभिरुक्तं योग्यतासंशयकालेपि शाब्दबोधानुभवसिद्धः तदानीं च योग्यताघटितोक्तहेतोर्नि
र्णयासंभवेनानुमितिर्न संभवति लिंगतावच्छेदकांशे निर्णयांशे वा संशयात्मकपरामर्शस्यानुमित्यजनक
त्वात् तदंशे निर्णयात्मकपरामर्शस्यैवानुमितिजनकत्वादिति शाब्दप्रमितिविशेषस्वीकारस्यावश्य य
कतया तदनुरोधेन शब्दस्य प्रमाणान्तरत्वस्वीकार आवश्यक। नच योग्यतासंशयस्य ग्राह्यसंशयपर्यवस
न्नतया तस्य चानुमित्यनुगुणतया ग्राह्यसंशयान्यसंशयत्वेन स्यैवानुमितौ पयिकनिश्चयत्वघटकत
या योग्यतांशे संशयात्मकादपि परामर्शादनुमित्यनुपपत्तिरिति वाच्यं ॥ गौरवात् ग्राह्यसंशयान्यसंश
यत्वे दस्यानुमितिजनकतावच्छेदककोटिनिविष्टनिश्चयत्वघटकत्वे सर्वत्र निश्चितस्वव्याप्तिकसंदिग्धसा
ध्यकरूपलिंगकात् वह्निव्याप्यवह्निमानयं स्याद्याकारकपरामर्शादनुमित्यापत्तेश्च ॥ ननु लिंगतावच्छेदका
...व्यापकस्य साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानस्यानुमितिहेतुत्वोपगमेन लिंगतावच्छेदकांशे संश राम
...स्यापि किंचित्करत्वं यथा तदिदं योग्यताघटितधर्मावच्छिन्नलिंगकपरामर्शादप्यनुमितिः स्यान्नवत्तिरेव बा ८
...वरूपयोग्यतांशे संशये बाधाभावत्वेन तन्निश्चयासंभवेपि व्याप्यत्वेन तन्निश्चयसंभवेन योग्यता

...विशिष्यानुमितिः संभवतीति चेन्नैवं हेतुतावच्छेदकस्य पक्षवृत्तौ संदेहे पक्षेपि हेतुतावच्छेदकविशिष्ट
...स्यावर्जितसंशयेन व्याप्यतावच्छेदकविशिष्टवत्तानिश्चयं विना व्याप्यत्वपुरस्कारेणापि पक्षे व्याप्यनिश्च
...भवात् विरोधिनिश्चयासत्त्वेन व्याप्यवत्तानुरोधव्याप्यसामान्याभावस्य भाने बाधकाभावात् ॥ अत एव
पर्वतीय हेतौ अयं धूमो धूलीपटलो वेति संदेहे हेतुतस्य आलोकादेर्निश्चये कदापि न वह्न्यनुमितिः नवै
त्यमयमालोको धूमो वा उभयथापि वह्निव्याप्य इति संशयस्य लोकयमनुमितिरितिवाच्यं ॥ तत्र व्याप्यतावच्छे
दकतयावगतान्यतरत्वादिना पक्षे धूमादिनिश्चयानंतरमेवानुमितेरुपगमादिति आहुः ॥ तदप्यसत् ॥
योग्यतायास्तद्घटितहेतोर्वा सर्वत्र निश्चयासंभवेपि तन्निश्चयदशायां तर्कोपनीतस्वहेतुताकावश्यमुप
पन्ननिश्चयविषयतात्पर्यलिंगकपरामर्शादेव शाब्दसमानाकारानुमितिसंभवेनानुमानान्तर्भावसंभवे शब्द
८ स्य प्रमाणान्तरत्वासिद्धेः ॥ अथ तात्पर्यं तत्त्वं जया बुबोधयिषितत्वं ॥ तथा च कर्मत्वादिकमाधेयतादिना घ
टादिमत्तेन घटादिमत्तया बुबोधयिषितत्वादित्याकारकानुमान एवांतर्भावो वाच्यः स च न संभवति ॥
तेन संबंधेन घटादिरूपस्यापि तेन संबंधेन घटादिमत्तया बुबोधयिषितत्वेन तत्रोक्तहेतोर्व्यभिचा
रादिति चेन्न ॥ व्यभिचाराप्रतिसंधानदशायां भ्रमात्मकोक्तलिंगकपरामर्शात्तत्प्रतिसंधानदशायां
च भ्रमाद्भूतधर्मित्वादिरूपविशेषणावच्छिन्नोक्तलिंगकप्रमात्मकपरामर्शादनुमितिसंभवादिति वदं
ति ॥ अत्र नैयायिकाः ॥ व्याप्त्याद्यप्रतिसंधानविरहदशायामपि शाब्दबोधस्यानुभविकतया तदानीमनु
मितिसामग्र्यभावेनानुमित्यसंभवात् शब्दस्य प्रमाणान्तरत्वमावश्यकं ॥ यद्यत्र शब्दस्य प्रमाणान्तरत्वे

न्या. कौ.
६

तथा२

सर्वत्र शाब्दबोधजनकसामग्र्यंतरकल्पने गौरवमिति सर्वत्र शाब्दबोधस्थले व्याप्त्यादिप्रतिसंधानकल्प
नमेवस्य कल्पतिकॢप्तसामग्र्यैवोपपत्तौ सामग्र्यंतरकल्पने न लाघवं इति विभाव्यते तथापि न क्षतिः चैत्रवा
क्यादयमर्थः श्रुत इत्यादिव्यवहारविषयतया शाब्दत्वविलक्षणानुभवस्वीकारस्यावश्यकत्वात् तत्करणतया
शब्दस्य प्रमाणांतरत्वावश्यकत्वात् ॥ न च तत्र श्रु धातोरनुमित्यर्थकतया न विलक्षणानुभवसिद्धिः कुतस्तत्कर
णतया शब्दस्य प्रमाणांतरत्वमिति वाच्यं ॥ तथा सति पर्वतो वह्निमानित्याद्यनुमित्यनंतरं पर्वते वह्निरनु
मित इत्यादिव्यवहारवत् पर्वते वह्निः श्रुत इत्यादिव्यवहारापत्तेः । न च शब्दहेतुकानुमितेः श्रु धात्वर्थत्वोप
गमान्नोक्तापत्तिरिति वाच्यं ॥ तथापि घटशब्दहेतुनाकाशे आकाशपदशक्यत्वमनुमितं तत्राकाशे आ
काशपदशक्यत्वमनुमितमिति व्यवहारवदाकाशे आकाशपदशक्यत्वं श्रुतमिति व्यवहारस्य दुर्वारत्वा
त् न च समाप्तितत्संबंधेन शब्दहेतुकानुमितेः श्रु धात्वर्थत्वान्नोक्तदोषः ॥ उक्तस्थले समवायेन शब्दस्य
हेतुत्वादिति वाच्यं एवमप्याकांक्षादिज्ञानविरहदशायां पदस्माप्तितत्संबंधेन शब्दहेतुकानुमितिस्तत्र
श्रुतत्वव्यवहारस्योद्धर्तुमशक्यत्वात् ॥ न च नैयायिकसिद्धशाब्दसामग्रीसमवधानाव्यवहितो
त्तरानुमितेः श्रु धात्वर्थत्वान्न दोष इति वाच्यं ॥ तादृशसामग्र्याद्यप्रतिसंधाने तादृशव्यवहारानुपपत्ते न
अनंततायाः शब्दार्थादिभेदभिन्नसामग्र्या अननुगमेन श्रु धात्वर्थत्वग्रहानुपपत्तेश्च ॥ एतेन श्रु धातोः श्रा ६
वणप्रत्यक्षविषयार्थकत्वोपपत्तेः शब्दः श्रुत इत्याद्येकमेव प्रत्ययस्य प्रतिपत्त्यनुबंधि विषयतार्थकत्वेऽपि चैत्रवाक्यादयमर्थः
श्रुत इत्यादौ आपाततो बुधि विषयत्वेवार्थः । उच्यते उक्तस्थले तादृशविषयताया अपि कर्मप्रत्ययार्थत्व

स्य कॢप्तत्वान्न च तत्र श्रावणप्रसक्त्या यच्छब्दलिंगकानुमित्यात्मकव्यापारविषयतापार्थकत्वेन चैत्रवाक्या
दयमर्थः श्रुत इत्यादिव्यवहारोपपत्तौ न तद्धेतुरोधेन शाब्दत्वविलक्षणानुभवसिद्धिरिति न शब्दस्य प्रमाणांत
रत्वं अत एवाचार्यैः श्रोतव्य इति श्रुत्यनुरोधेन श्रु धातोः शाब्दानुभवार्थकत्वमपि नाशंकनीयं तत्राप्युक्तरीत्यैवो
पपत्तेरित्यपि परास्तं ॥ आकांक्षादिज्ञानाभावकालीनशब्दलिंगकानुमितिमादाय तद्विषये श्रुत इति व्यवहारापत्तेः
किंच श्रु धातोः श्रावणप्रत्यक्षमात्रार्थकत्वे चैत्रवाक्यात् श्रुतोयमर्थ इत्यादौ हेतुपंचम्यनुपपत्तिः श्रावणे प्रत्यक्षे वा ६५
क्यस्य विषयतया हेतुत्वेऽपि च यतः घटो दृष्ट इत्यादिप्रयोगवारणाय विषयत्वेन हेतुतेति रिक्ताया हेतुताया एव
हेतुपंचम्यर्थतया तस्य वाक्ये सत्त्वात् न च कर्मप्रत्ययार्थघटकज्ञाने हेतुपंचम्यर्थान्वयः वाक्यपदलक्ष्यवाक्य
ज्ञानस्यानुमित्यात्मकतादृशज्ञाने हेतुत्वादिति वाच्यं तादृशज्ञाने हेतुपंचम्यर्थान्वयोपगमेनुमितिरूपे तादृश
ज्ञाने व्याप्तिज्ञानादेर्हेतुतया व्याप्त्यादेः श्रुत इत्यादिव्यवहारस्य दुर्वारत्वात् तस्मात् शाब्दत्वविलक्षणानुभवा
स्य श्रु धात्वर्थत्वमावश्यकं । यत्तु । शाब्दत्वविलक्षणानुभवस्य श्रु धात्वर्थत्वेऽपि न तत्करणतया शब्दस्य प्रमा
णांतरत्वं शब्दत्वस्यानुमितित्वव्याप्यत्वोपगमेनानुमानएवांतर्भावात् ॥ न च । शाब्दबोधेनुमितित्वसत्त्वे भा
नाभावेन शाब्दत्वस्यानुमितित्वव्याप्यत्वं न संभवतीति वाच्यं । विरुद्धमते समानविषयकप्रत्यक्षसामग्रीकाले
तादृशशाब्दबोधवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकत्वांतरं कल्पनीयमिति गौरवं । आप्यत्वमतेतु ।
तादृशसामग्र्या अनुमितिस्थलीयकॢप्तसामग्रीप्रतिबंधकतयैवोपपत्तौ न तत्कल्पनमिति लाघवतर्क
सहकृतानुमानस्यैव तत्र मानत्वात् ॥ अथ शाब्दत्वानुमितित्वप्रकारकेच्छयोः पृथगुत्तेजकत्वानुरोधेन
प्रतिबंधकताभेदस्यावश्यकतया न कॢप्तप्रतिबंधकतयोपपत्तिः । न चैकत्रैवेच्छाद्वयस्योत्तेजकत्वात् पृथ

ति॰

व्या॰ कौ॰ जकत्वमेवास्विरुद्धमितिवाच्यं॥ तथासतिशाब्दत्वप्रकारकेच्छाकालेप्रतिबंधकतादृशसामग्रीसत्वेऽस्म
त्यांशाब्दसामग्र्यांशाब्दान्यानुमित्यापत्तेरितिचेन्न। यादृशविषयविशिष्टेषुसमानविषयकप्रत्यक्षसामग्रीका
१५ लेशाब्दत्वप्रकारकेच्छाबलान्नतादृशशाब्दबोधस्तादृशान्तविषयेषुइच्छोत्तेजकत्वानुरोधेनप्रतिबंधकतान्ते
राभावेनशाब्दबोधेप्रतिबंधकत्वात्कल्पनप्रयुक्तधर्म्मलाघवस्यानपायात्। एवंविरुद्धत्वमते एकस्मिन्नेवविष
येशाब्दानुमित्योस्सामग्रीसत्वेऽनुमित्यापत्तिवारणायानुमितौशाब्दसामग्र्याः प्रतिबंधकत्वांतरकल्पनेगौ
रवं। व्याप्यत्वमतेतुतत्रशाब्दात्मकानुमितेरुत्पत्तेस्यापत्त्यभावेनतदकल्पनेलाघवमितितिलाघवसत्वे
नतत्सहकृतानुमानमपिशाब्दबोधेऽनुमितित्वसत्वेमानं। अथशाब्दत्वस्यानुमितित्वव्याप्यत्वेशाब्दसामग्र्या
व्याप्त्यादिज्ञानंचइतितत्पाग्गुरुशरीरत्वेनभिन्नविषयकप्रत्यक्षादौशाब्दसामग्र्याःप्रतिबंधकतायामवच्छेदक
गौरवंलिंगादिभेदेनएकैकविषयएवन्यायमतापेक्षयाशाब्दसामग्रीबाहुल्येनप्रतिबंधकताबाहुल्येनेति
चेतुन। अन्वयिव्यतिरेकिलिंगकानुमित्योस्सामग्रीभेदेप्येकजातीयत्वस्यव्याप्त्यादिज्ञाननिरपेक्षपदज्ञानघ
टितसामग्र्याःशाब्दानुभवजनकत्वेऽपितस्यानुमितिजातीयत्वाविरोधेनव्याप्त्यादिज्ञानेशाब्दसामग्रीघटक
त्वस्यास्मानिरप्यनुपगमात्। नन्वव्याप्त्यादिज्ञानंविनाशाब्दात्मकानुमित्युपगमेतत्रव्याप्त्यादिज्ञानस्यानुमिति
हेतुतायांव्यभिचारइतिवाच्यं। अन्वयव्यतिरेकव्याप्तिज्ञानयोःपरस्परजन्यानुमित्याविवशाब्दत्वस्यानुमिति
त्वव्याप्यत्वेपिव्याप्त्यादिज्ञानाव्यवहितोत्तरत्वस्यतत्कार्यतावच्छेदकत्वेनैवतस्यनिरासस्संभवात्॥ नन्वशा राम
ब्दजनकस्य[illegible]रादिज्ञानस्यजन्यतावच्छेदककोटावनुमितित्वस्याप्रवेशात्कार्यतादृशसामग्रीजन्य १५
ज्ञानस्यानुमिति[illegible]वाच्यं। अनुमितित्वावच्छिन्नप्रत्यनावज्ञानस्यकारणतयाशाब्दसामग्र्याअ

व्यवज्ञानरूपानुमिति[illegible]वच्छिन्नकारणात्मकाकांक्षाज्ञानघटिततत्पात्तजन्यबोधस्यानुमितित्वसंभवात्।
अथसिद्धिकालेशाब्दबोधोधर्म्यैवनतत्रपक्षतातयाऽनुमित्तिहेतुत्वेव्यभिचारइतितदावरणायशाब्दत्वा
नुमितित्वमेवतज्जन्यताविच्छेदकंवाच्यमितिशाब्दत्वस्यानुमितित्वव्याप्यत्वेतत्रशाब्दान्यत्वनिवेशप्रयुक्ते
गौरवंदुर्वारमितिचेन्न। पक्षतायालिंगविशेषनियंत्रिततयातत्तल्लिंगकानुमितौतत्तल्लिंगकेच्छाविरहवि
शिष्टसिद्ध्यभावस्यहेतुतयानयलिंगकपरामर्शजन्यसिद्धिकालीनान्यलिंगकेच्छाधीनानुमितौव्यभिचारवा
रणायतत्तल्लिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यत्वस्यजन्यतावच्छेदकोटावावश्यकतयासिद्धिकालीनशा
ब्दानुमितौव्यभिचाराभावात्। नन्वव्याप्त्यादिज्ञानाजन्यशाब्देऽनुमितित्वोपगमेऽपसिद्धांतइतिवाच्यं। पक्ष
तायाअजन्येऽनुमितित्वोपगत्तरेणमस्माकंव्याप्त्यादिज्ञानाजन्येप्यनुमितित्वोपगमेऽपसिद्धांताभावादिति
नव्यवैशेषिकैरुक्तं॥ तदत्पृतमसत्॥ व्याप्त्यादिज्ञाननिरपेक्षशाब्दसामग्रीतोऽनुमितिस्वीकृत्यशाब्दत्वस्या
नुमितित्वव्याप्यत्वस्वीकारेविनिगमनाविरहेणपदज्ञानादिनिरपेक्षानुमितिसामग्रीतःशब्दबोधंस्वीकृत्या
नुमितित्वस्यशाब्दत्वव्याप्यत्वापत्तेर्दुरुद्धरत्वात्। नवशाब्दत्वस्यानुमितित्वव्याप्यत्वेउक्तलाघववदनुमिति
त्वस्यशाब्दत्वव्याप्यत्वेलाघवाभावान्नविनिगमनाविरहइतिवाच्यं॥ समानविषयकप्रत्यक्षसामग्र्यास्ता
दृशानुमितिंप्रतिप्रतिबंधकत्वांतरंनकल्प्यतेतादृशशाब्दबोधंप्रतिक्लृप्तप्रतिबंधकतयैवोपपत्तेरितिलाघव
स्यसंभवात्॥ नन्वानुमितिजनकव्याप्त्यादिज्ञानजन्यतावच्छेदककोटौशाब्दत्वस्यानिवेशात्कार्यतादृशसा
मग्रीजन्यज्ञानस्यशाब्दत्वमितिवाच्यं। पदज्ञानस्यशाब्दबोधेपदविषयकत्वमनिवेश्यज्ञानत्वादिनाकार

पा॰ कौ॰ ण्ता संभवेन लिंगज्ञानस्य लिंगविषयकत्वमनिवेश्य ज्ञानत्वादिनानुमितिकारणत्वेनानुमितिसामग्री
१० जन्यतावच्छेदककोटौ शाब्दत्वनिवेशसंभवात् नचाकांक्षादिज्ञानं विनानुमित्यात्मकशाब्दबोधोपगमे त
त्राकांक्षादिज्ञानस्य शाब्दबोधहेतुत्वमपि मनिवारमितिवाच्यं ॥ एकैकविधशाब्दबोधप्रयोजकानुपूर्वीविशे
षरूपाकांक्षादीनामननुगततया परस्परजन्यशाब्दबोधे व्यभिचारवारणाय तज्ज्ञानजन्यतावच्छेदकको
टावव्यवहितोत्तरत्वनिवेशस्यावश्यकतयोक्तव्यभिचाराभावात् । ननु योग्यतायाः एकपदार्थे परपदार्थव
त्वरूपाया अननुगतत्वेन तज्ज्ञानजन्यतावच्छेदके अव्यवहितोत्तरत्वनिवेशस्यानावश्यकतया तद्धेतुताया
व्यभिचारो दुर्वार इति वाच्यं ॥ बाधनिश्चयाभावस्य क्ऌप्तहेतुतयैव निर्वाहे शाब्दबोधे न व्यमते योग्यताज्ञा
नहेतुताया एवाभावात् तदंगीकर्तृमतेपि । प्राचीनैश्चानुमितावपि संशयसाधारणविशेषदर्शनसंसर्गाभा
नहेतुतांगीकारेण योग्यताज्ञानस्यानुमितौ तन्मते व्यभिचाराभावाच्च ॥ ननु अनुमितित्वस्य शाब्दत्वव्या
प्यत्वेनुमिनोमीत्यनुव्यवसायस्य वे शृणोमीत्यनुव्यवसायापत्तिरिति वाच्यं ॥ शाब्दत्वस्यानुमितित्वव्याप्य
त्वेपि शृणोमीत्यनुव्यवसायस्येवानुमिनोमीत्यनुव्यवसायस्य दुर्वारत्वात् ॥ नचानुमितित्वप्रकारता
निरूपितविशेष्यतासंबंधेन साक्षात्कारं प्रति शाब्दबोधभेदस्य हेतुत्वोपगमान्नोक्तापत्तिरिति वाच्यं ॥ शा राम
ब्दत्वप्रकारतानिरूपितविशेष्यतासंबंधेन साक्षात्कारं प्रति अनुमितिभेदस्य हेतुतया पूर्वोक्तापत्ति १०
वारणस्य समसाधिकत्वात् । ननु अनुमितित्वस्य शाब्दत्वव्याप्यत्वे पदज्ञानघटितसमानविषयकशा
ब्दबोधसामग्रीकाले तादृशसामग्रीजन्यशाब्दबोधो जायतामितीच्छासत्वे तादृशसामग्रीजन्यशाब्दात्म

कानुमितिवारणाय तादृशसामग्र्यास्तत्र प्रतिबंधकत्वकल्पनाधिक्यमिति वाच्यं शाब्दत्वस्यानुमितित्वव्या
प्यत्वेपि व्याप्त्यादिज्ञानघटितसमानविषयकानुमितिसामग्रीकाले तादृशसामग्रीजन्यानुमितिर्जायतामिति
च्छासत्वे तादृशसामग्रीजन्यानुमित्यात्मकशाब्दबोधवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्प
नाधिक्यात् । नच । तत्र तादृशशाब्दबोधस्यापि स्वीकारे क्षतिविरह इतिवाच्यं ॥ मन्मतेपुक्तस्थले तादृशानु
मितेरपि स्वीकारे क्षतिविरहात् । नन्वेवं तत्रानुमिनोमीत्यनुव्यवसायापत्तिरितिवाच्यं । त्वन्मतेपि तत्र
शाब्दबोधस्वीकारे शृणोमीत्यनुव्यवसायापत्तेर्दुर्वारत्वात् । समाधानस्याप्युभयमते तुल्यत्वात् । वस्तु
तस्तु । शाब्दबोधोत्तरं नानुमिनोमीत्यनुव्यवसायेन शाब्दत्वस्यानुमितित्वव्याप्यत्वमसंभवि न च
तस्य व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमितित्वावच्छिन्नाभावविषयकत्वान्न दोष इति वाच्यं ॥ व्याप्त्या
दिप्रतिसंधानविरहदशायामपि तस्योत्पत्त्या तद्विषयकत्वासंभवात् ॥ केचित्तु । शाब्दत्वस्य अनुमिति
त्वव्याप्यत्वे वह्निव्याप्यसामान्याभावविशिष्टविशेष्यकवह्निशाब्दबोधानुपपत्तिः तद्विशिष्टे वह्निव्या
प्यवत्ताबोधासंभवेनानुमित्यसंभवादित्याहुस्तन्न सत् । उक्तरीत्या परामर्शनिरपेक्षाया एव सामग्र्या
अनुमितिजनकत्वोपगमे नोक्तानुपपत्तेरसंभवादिति दिक् अत्र प्राचीनमीमांसकाः । न वेदतत्कारी
त्याशब्दस्य स्वतंत्रप्रमाणत्वे तथापि तन्न शब्दमात्रस्य किंतु । नहि विशेषस्य तथा हि । घटमानयेत्यादिलौकि
कवाक्यश्रवणानंतरं अयं वक्ता आधेयतासंसर्गककर्मत्वादिविषयकघटादिविशिष्टज्ञानवान्
आधेयतासंसर्गेण कर्मत्वादिसाकांक्षघटादिज्ञानं तज्जन्यं भ्रमाद्यजन्यप्रयुक्ततत्प्रयोक्तृत्वात्
यो यत्संसर्गकयत्साकांक्षयज्ज्ञानजन्यभ्रमाद्यजन्यवाक्यप्रयोक्ता स तत्संसर्गकतद्विषयकविशिष्ट

न्या॰ कौ॰ ज्ञानवान् घटमानयेति वाक्यप्रयोक्तृकर्मत्वविषयकपदविशिष्टज्ञानवान् एवमिवेत्यनुमानमूलकात्
११ कर्मत्वादिकमाधेयत्वघटत्वेन संसर्गेणास्तु विषयकघटविशिष्टज्ञानवदुक्तपदस्मारितत्वात् घटा
दिनिष्ठकरणत्वादिवदित्यनुमानाद्घटीयकर्मतेत्यनुमितेस्तस्यानंतरं घटीयकर्मतेत्यादिशाब्दबोध
इति लौकिकशब्दमात्रमनुवादकं न तु प्रमाणं वैदिकशब्दमात्रं तु प्रमाणं वेदस्य नित्यतया वक्तुरभावे
न तत्र वक्तृपदकानुमानासंभवेन तन्मूलकोपदर्शितानुमानासंभवेनोपदर्शितरीत्यानुवादकत्वासंभ
न्यो वात् गृहीतग्राहित्वानुभवकरणत्वमनुवादकत्वं गृहीताग्राहित्वानुभवकरणत्वं च प्रमाणत्वमिति वि
वेकः इति वदंति तन्न । सत्यलाघवेन प्रमाकरणत्वस्यैव प्रमाणत्वरूपतया लौकिकवाक्यजन्यशाब्दबोधपू
र्वमनुमानेन शाब्दसमानाकारज्ञानोत्पादेपि तस्याप्रमाणत्वसंभवात् ॥ एतेन शाब्दसामग्रीसंपादक
तया लौकिकवाक्यजन्यशाब्दबोधपूर्वं तत्समानाकारज्ञानमावश्यकमिति लौकिकवाक्यमनुवादकं वैदि
कवाक्ये तु तदनावश्यकतया तत्प्रमाणं तथा हि … विद्याद्यप्रमाकृ… नियमनिवृत्तिः पृ शाब्द
वि मात्रं किं कारणमपेक्ष्य तत्र लोकवेदसाधारणं यथा यत्तात्पर्यकत्वं तत्र शाब्दबोधनिरूपितज्ञान
निष्ठकारणताया विषयतावच्छेदकं शाब्दबोधनिरूपितकारणतावच्छेदकज्ञानविशिष्टकरणस्य
शब्दस्य शाब्दबोधजननीये सहकारित्वेन तस्य तज्जनकत्वात् यत्र यज्ज्ञाननिरूपितकरणतावच्छे राम
दकज्ञानविशिष्टकरणस्य यज्ज्ञानजननीये सहकारित्वे सति सतत्प्रजनकं भवति तत्र तज्ज्ञाननिरू ११
पितज्ञाननिष्ठकरणताया विषयतावच्छेदकं यथा व्याप्तिः शब्दशक्तिश्चेत्यनुमानेन यथार्थतात्पर्य
कत्वज्ञानस्य शाब्दबोधे हेतुत्वं सिद्धं अत्र चक्षुरादीन्द्रियसंनिकर्षे व्यभिचारवारणाय सत्यंतं तत्तद्घटक

विशिष्टत्वेन लिंगपरामर्शे व्यभिचारनिरासः परामर्शस्य विशिष्टसहकारित्वात् यस्मिन् सति यदभावात्का
र्याभावस्तस्यैव तत्सहकारित्वेन परामृश्यमाणलिंगत्वेनानुमितिकरणतया परामर्शविशिष्टलिंगसत्त्वे परा
मर्शाभावस्यासंभवात् कृतेव द्धिमान् कृत्वादित्यादौ परामृश्यमाणलिंगसत्त्वे विप्याप्यभावेन प्रमानुमि
त्यभावप्रसिद्ध्यांतत्वसंगतिः व्याप्तिपक्षधर्मतावल्लिंगत्वेन प्रमानुमितिकरणत्वात् । यत्तु एवमपि सल्लिं
गपरामर्शे व्यभिचारो दुर्वारः परामृश्यमाणलिंगत्वेपि सल्लिंगपरामर्शाभावसंभवादिति तच्चिंत्यं । विशेष्य
वति विशिष्टस्य न प्रस्य विशेष्ये विशेषणाभावपर्यवसानेन परामृश्यमाणलिंगसत्त्वे सल्लिंगपरामर्शाभा
वस्य लिंगे व्याप्तिपक्षधर्मत्वरूपसत्ताभावपर्यवसानात् बाधाभावाद्व्यभिचारवारणाय विशेष्यम
तत्त्व । तात्पर्यं वैदिककपिंजलानालभेतेत्यादौ लाघवादितर्कनिर्णीत त्रित्वविशिष्टकपिंजलपदार्थपरत्व
कुर्वन्तं कपिंजलपदमिति सामान्यतः कपिंजलपदार्थत्वादिना तद्धि ज्ञानमेवोपयुज्यते सामान्यरूपेण
निर्णयेपि तत्र पदार्थानां नियतत्वेन विशेषरूपेण तात्पर्यासंदेहात् लौकिके तु घटमानयेत्यादौ घटविशि
ष्टकर्मतापरं द्वितीयांतं घटपदमिति विशेषतः घटत्वादिना तद्धितमेवोपयुज्यते तत्र पदार्थानामनिय
तत्त्वेन सामान्यरूपेण निर्णये विशेषरूपेण तात्पर्यसंदेहसंभवात् । एवं च लोके विशेषतो यथार्थता
त्पर्यनिर्णयानुरोधेन शाब्दबोधपूर्वं विशेषतः एकपदार्थेऽपरपदार्थनिर्णयस्यावश्यकतया लौकिक
वाक्यस्यानुवादकत्वं वैदिकस्य तु प्रमाणत्वं ॥ ननु केयं लाघवतर्कोऽधन्मूलकं वेदवाक्यस्य प्रमाणत्व
मिति चेत् । अत्र केचित् कपिंजलानालभेतेत्यादौ बहुवचनस्य यावत्त्वकपिंजलपरत्वे यावदालंभनस्या

न्या॰कौ॰ शक्यतया। ननु स्वानलक्षणाग्रामाण्यापत्तिः शक्यानुसारतया वक्तृत्वेनानुगमापत्तिरिति किंचित्पर
१२ त्वापरपकत्वे त्रित्वपरत्वमेव कल्प्यते चतुष्ट्वादिप्रकारकचतुष्ट्वादिप्रसक्ते त्रित्वादिसंख्येकत्वसा
त्वात्कारस्य हेतुतया चतुष्ट्वादिविशिष्टचतुष्ट्वापेक्षया त्रित्वत्वविशिष्टत्रित्वस्य प्रथमोपस्थित
त्वेन तस्यैव लाघवतर्कत्वेन चातिरिक्तबहुत्वत्वे त्रित्वादिवृत्तौ वा बहुत्वत्वजातेरेव बहुवचनश
क्यतावच्छेदकतया नेन रूपेण चतुष्ट्वादेरपि प्रथमोपस्थितत्वं संभवतीति वाच्यं। बहुत्वं बहुत्वं च
मातिरिक्तत्रित्वत्वादिकमेव बहुवचनशक्यतावच्छेदकमित्याशयात्॥ अथ तथापि त्रित्वस्यनोक्त
रीत्या प्रथमोपस्थितत्वं चतुष्ट्वादिप्रकारकचतुष्ट्वादिप्रत्यक्षे एकत्वचतुष्ट्वादिप्रत्यक्षस्य द्वित्वा
द्यादिप्रत्यक्षस्य चाहेतुत्वसंभवेन त्रित्वादिसंख्येकत्वप्रत्यक्षस्य हेतुत्वादिति चेदेवमपि बहुत्वं
संख्याया त्रित्वादिक्रमेणैव गणनया गणनाक्रमेण त्रित्वस्य प्रथमोपस्थितत्वेन प्रथमस्यागेमा
त्ये८ नाभावेन त्रित्वस्य चतुष्ट्वादौ फलतो त्वेन च चतुष्ट्वादेरनुपयोगे न च तस्य लाघवतर्कत्वसंभवात्। न
च चतुष्ट्वादौ फलकमानाभावात्॥ अन्यथानुपपत्त्यैव तत्कल्पनेन प्रकृते नुपपत्त्यभावात् न च
तादृशप्रथमोपस्थितत्वस्य लाघवतर्कत्वे मानाभाव इति वाच्यं॥ तथा सति पूर्वोक्तप्रथमोपस्थि
तत्वस्यापि प्रथमोपस्थितत्वमात्रस्य वा लाघवतर्कत्वं न स्यात् किं बहुना वेदे लाघवतर्कादिकू राम ४२
पन्यायान्यमेव तात्पर्यं वेदजन्यशाब्दबोधे नियामकं न तु न्यादिति स्याप्ये हि प्रसंगात्। न चानादि
मीमांसकपरंपरया तथाव्यवहारेण तत्सिद्धिरिति वाच्यं प्रकृते पि तुल्यत्वात्। अनादिमीमांसकपर

सि॰

म्परया तर्कत्वेन व्यवहारस्य विषयत्वस्यैव तर्कत्वात्। अत एव समानप्रकारकत्वसमानविशेष्यकत्वयोस्त
त्वेपि शास्त्रकृतां समानविशेष्यकत्वस्यैव लाघवतर्कत्वोक्तिः संगच्छते॥ तत्रैव शास्त्रकृतां तथा व्यवहारा
दित्याहुः। अन्ये तु मा हिंस्यात्सर्वभूतानीति श्रुत्या हिंसाया दुरदृष्टसाधनत्वबोधने श्येनेनाभिचरन्य
जेतेति श्रुत्या श्येनस्य तादृशसाधनत्वविशिष्टसाधनत्वलक्षणविध्यर्थबोधने बाधापत्ति
रिति वैधेतरहिंसाया दुरदृष्टजनकत्वं मा हिंस्यादिति श्रुत्या बोध्यतरस्तु पेयं तथा च वैधत्वस्यानुगतस्या स५
भावेन तत्तद्व्यक्तित्वेन तत्तद्धिंसाव्यक्तिभेदकूटस्यैव दुरदृष्टजनकतावच्छेदककोटौ निवेशेन कपिञ्जलाना
लभेतेत्यत्र बहुवचनस्य चतुष्ट्वाद्यर्थकत्वे हिंसाभेदचतुष्ट्वादिनिवेशे गौरवापत्त्या भेदत्रयनिवेशलाघ
वात् त्रित्वमेव बहुवचनस्यार्थः। यत्तु वैधेतरहिंसात्वेन न दुरदृष्टजनकत्वं किंतु वक्ष्यमाणवैधेतरहिंसात्व
त्ति वैजात्यविशेषस्याकल्पिततानीयमानत्वेनेति नोक्तरीत्या गौरवावकाशः तन्न भेदस्यावच्छेदक
कोटावनिवेशादिति॥ तदसत्। विजातीयहिंसात्वेन दुरदृष्टजनकत्वेपि मा हिंस्यादिति श्रुतेस्ताद
शजनकताबोधकत्वे वैधहिंसायामपि तादृशवैजात्यसंदेहेन निष्कंपप्रवृत्त्यनुपपत्तिरिति वैधेतर
हिंसा दुरदृष्टजनिकेत्याकारकबोधजनकत्वमेवाभ्युपेयमिति हिंसान्यतदृष्टयादिभेदस्य जनकतावच्
छेदककोटिनिवेशप्रयुक्तगौरवाभावेपि तादृशशाब्दबोधस्य तादृशभेदचतुष्ट्यादिविषयकत्वकल्पने
न प्रयुक्तगौरवस्य दुरुद्धरत्वात्। एतेन वैधेतरहिंसात्वेन दुरदृष्टजनकत्वे तावद्भेदकूटनिवेशगौरवा
पत्त्या लाघवाद्वैधहिंसायास्तत्तद्व्यक्तित्वेनैव दुरदृष्टजनकत्वं कल्प्यत इति तद्भेदचतुष्ट्यादेर्जनक

न्या॰कौ॰ तावच्छेदककोटिनिवेशप्रयुक्तगौरवावकाश इति परास्तं ॥ तावतापि तत्कगौरवस्य दुर्वारत्वात् । नच त
१३ भक्तित्वेन जनकतामेव माहिंस्यादिति श्रुतिर्बोधयतीति वाच्यं ॥ तथासति वैधहिंसाया अपि तत्तद्
भक्तित्वसंदेहेन तत्र निष्कंपप्रवृत्त्यनुपपत्तेर्द्वेषं प्रतिबलवदनिष्टप्रतिबन्धकत्वनिश्चयस्यैव हेतुतया वै
धहिंसायामपि तत्तद्भक्तित्वसंदेहेन वैधानुत्पादप्रसंगाच्चेत्याहुः । तदसत् । जकुपादाकुलैर्मंत्रैरित्या
दौ बहुवचनस्य त्रित्वपरत्वानुपपत्तेः नच तत्र बहुवचनस्य त्रित्वपरत्वं संदिग्धमिति वाच्यं । तथापि
श्राद्धप्रकरणे ब्राह्मणान् भोजयेदिति वेदस्य बहुवचनस्य त्रित्वपरत्वानुपपत्तेः । दुर्वारत्वात् नच तत्रा
पि तत्संदेहः पितृकार्ये त्रीनित्यादिवचनैकवाक्यतया तत्परत्वनिर्णयात् । केचित्तु । कपिंजलानालभे
तेत्यत्र बहुवचनस्य च लक्षणादिपरत्वे चतुष्ट्वादिव्यक्तिषु तादृशवाक्यजन्यशाब्दबुद्धेर्विषयत्व
कल्पने गौरवं त्रित्वपरत्वे त्वपरस्यैव तत्कल्पने न लाघवमिति बहुवचनस्य त्रित्वपरत्वमित्याहुः ॥ अपर
तु चतुष्ट्वादिकपरत्वकल्पने चतुष्ट्वाद्यालंभनस्य फलहेतुत्वकल्पने तज्जन्यकालिकापूर्वादिकल्प
नेच गौरवात् त्रित्वएव विधेस्तात्पर्यं स्वत्वं च चतुष्ट्वाद्यालंभनस्य तेतद्घटकेन नंगत्वेन तत्संवधानात् क राम
र्षे गुण एवेत्याहुः ॥ ननु कपिंजलानालभेतेत्यत्र त्रित्वस्यापि स्वसंबंधेनान्वयस्समवायेन चानाद्ये छे १३
दनस्य प्रत्येकपर्याप्ततया त्रित्वपर्याप्त्यधिकरणकपिंजलकर्मकछेदनस्याप्रसिद्धत्वात् न द्वितीयः त
था सत्येककपिंजलछेदनेपि कृतकृत्यतापत्तेः एकस्यापि त्रित्वसमवायित्वात् ॥ मैवं । त्रित्वस्य पर्याप्ति
संबंधेनैवान्वयः छेदनत्वरूपेण निखिलछेदनस्य त्रित्वपर्याप्त्यधिकरणकर्मकत्वसंभवेनोक्तदो

षाभावादिति । नन्वेवं तथा सत्येककपिंजलछेदनेपि चरितार्थत्वप्रसंगात् कुत्रविजातकपिंजलत्रयछेदनस्य
कपिंजलत्रयकर्मकत्वसंभवादिति चेत् । अत्र वदंति । कपिंजलानालभेतेत्यत्र न तावत् कपिंजलकर्मकछेदनबो
धः संभवति विजातीयावयवविभागानुकूलव्यापारात्मकछेदनस्य कपिंजलकर्मकत्वासंभवात् ॥ किंतु
कपिंजलपदस्य कपिंजलावयवे लक्षणोपगमेन कपिंजलावयवकर्मकछेदनबोधो भ्युपेयः बहुवचनार्थत्रि
त्वं च न कपिंजलावयवेन्वेति तादृक्कपिंजलस्यावयवत्रयछेदनेनैव कृतकृत्यतापत्तेः किंतु कपिंजलएव त्रित्वस्य
समवायेनान्वयः ॥ नन्वेवं कपिंजलस्य पदार्थतावच्छेदकत्वेन तत्र कथं संख्यान्वय इति वाच्यं । धान्यस्य गृहे संप
न्नो व्रीहिरित्यादौ जातावेकवचनदर्शनेन क्वचित्पदार्थतावच्छेदकेपि सुधिभिस्तत्र संख्यान्वयस्योपगमात् ॥
एवं च तादृशत्रित्वसमवायिकपिंजलत्रयस्य प्रत्येकं प्रत्येकावयवेन्वयः ॥ तादृशवाक्यस्य प्रत्येकक्रमेण प्रत्ये
कावयवे तादृशत्रित्वपर्याप्त्यधिकरणकपिंजलान्वय एव साकांक्षत्वं न त्वेकमात्रभक्तेरन्वये इति नातिप्रसं
गसंभावनापि ॥ एतेन कपिंजलचतुष्टयछेदनेपि कपिंजलत्रयछेदनस्य जातत्वात् कपिंजलचतुष्टयछेदनेऽक
र्मसांगतापत्तिः ॥ नच कपिंजलत्रयछेदनानंतरं कपिंजलांतरछेदनेन कपिंजलत्रयछेदनाभाव इति तत्कर्माधि
न कर्मणो भंगत्वव्यवधानान्नोक्तदोष इति वाच्यं ॥ एककालेपि कपिंजलचतुष्टयछेदनस्य संभवे न गतव्यवधाना
संभवादित्यपि परास्तं ॥ तादृशवाक्यस्य प्रत्येकक्रमेण कपिंजलत्रयान्वय एव साकांक्षतान चतुष्टयस्यान्वयेर
त्यनुपमादिति तस्मादुक्तरीत्या वेदवाक्यस्य च प्रमाणत्वं न तु लौकिकवाक्यस्येति निर्व्यूढमिति प्राभाकरमतम
पपास्तं ॥ प्रमाणत्वस्य प्रमाकरणत्वरूपतया यथार्थतात्पर्यनिश्चयानुरोधेन शाब्दबोधे पूर्वं तत्समानाकार
नुभवसत्त्वेपि लौकिकवाक्यस्य प्रमाणत्वेबाधकाभावात् ॥ लाघवेनैकपदार्थेपरपदार्थवत्त्वरूपयोग्यताज्ञा

व्या॰को॰
२४

या: संशयनिश्चयसाधारणरूपेण शाब्दप्रमाप्रयोजकत्वसंभवेन यथार्थतात्पर्यनिश्चयस्य गौरवेण शाब्द
प्रमाप्रयोजकत्वं नावाक्यत्वघटितार्थनियतत्वज्ञानस्य विशेषतस्तात्पर्यसंदेहे प्रतिप्रतिबंधकत्वसाक्षात्सत्ता
स्वातंत्र्येण प्रतिबंधकत्वांतरस्य च गौरवेण मानाभावेन चाभावे न वैदिकवाक्येषु सामान्यतस्तात्पर्यज्ञा
नसत्त्वे विशेषतस्तात्पर्यसंदेहसंभवात्तत्रापि विशेषरूपेण पदार्थनिवेश्य विशेषरूपेण यथार्थतात्पर्य
ज्ञानहेतुत्वस्यावश्यकत्तया लौकिकवाक्यवद्वैदिकवाक्यस्याप्यनुवादकत्वस्य प्रसंगात्पौरुषेयत्वापत्तिरि
त्यपव्याख्यातम्। नन्वेवं घट: कर्मत्वमानयनं कृतिरित्यादितो घटमानयेत्यादाविव शाब्दबोधापत्तिरिति चेन्न
आकांक्षाज्ञानस्य शब्दजन्यशाब्दबोधजनने सहकारित्वात्॥ आकांक्षा चानुपूर्वीविशेषएव अनुगतायास्त
स्या दुर्वचत्वात्। तथा च यादृशयादृशानुपूर्वीतो यादृशान्वयबोधस्तत्र तादृशानुपूर्वीज्ञानं हेतुरिति फलि
तं। नन्वेवं घटमित्यादिस्थले कर्मताविशेष्यकाधेयतासंसर्गावच्छिन्नघटप्रकारताकशाब्दत्वावच्छि
न्नं प्रति घटपदोत्तरामपदज्ञानत्वादिना हेतुतेति पर्यवसितं तच्च न संभवति कलशमानयेत्यादिस्थले
यतादृशबोधे व्यभिचारात्॥ न च घटार्थकपदोत्तराम्पदज्ञानत्वादिना हेतुत्वान्नोक्तदोष इति वाच्यं॥ तथा
पि घटवानयेत्यादिस्थले व्यभिचारात्। न च घटार्थकपदोत्तरकर्मतार्थकविभक्तिज्ञानत्वादिनैव तत्र हेतु
त्वमतो नोक्तव्यभिचार इति वाच्यं॥ यत्र घटमित्यत्र घटपदान्न घटस्मृति:। किंतु कलशोऽस्तीत्यादिकलशस्य
तत्र एवं द्वितीयातोऽपि न कर्मत्वस्य स्मृति: किंतु परस्यानयनमित्यादिवदेव तत्रापि घटमित्यानुपूर्वीत:
कर्मताविशेष्यकाधेयतासंसर्गावच्छिन्नघटप्रकारताकशाब्दबोधप्रसंगादिति चेदत्र। केचित्। तादृश
शाब्दत्वावच्छिन्नं प्रति वृत्त्या घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिज्ञानत्वादिना हेतुत्वान्नो

राम
२४

क्तदोष: यद्यप्यत्र शक्त्या कर्मत्वोपस्थापकत्वस्य निवेशे घटस्यानयनं घटादायस्य रूपतीत्यादौ कर्मत्वे घटान्व
यधीर्न स्यात्तत्र लक्षणयैव तत्त्वधी: कर्मतायां शक्तिविरहात्तथा स्यात्तथा तन्निवेशे च घटमानयेत्यादौ च अस्यां कर्म
त्वलक्षणयापि कर्मत्वे घटान्वयधीप्रसंगस्तथापि शक्तिनिरूपकत्वस्याप्यन्तरत्वस्यापि कर्मत्वोपस्थापकत्वप्र
वेशान्न दोष:। न च तादृशशाब्दावच्छिन्नं प्रति घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिज्ञानत्वेन कर्मत्वो
पस्थापकविभक्तिप्रागव्यवर्त्तिघटोपस्थापकनामज्ञानत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरह इति वाच्यं।
विनिगमनाविरहेण तादृशहेतुताद्वयांगीकारात्। वस्तुतस्तु कर्मताविशेष्यकशाब्दत्वावच्छिन्नं प्रत्येव कर्म
त्वोपस्थापकविभक्तिप्राग्वर्त्तिनामज्ञानत्वेन हेतुत्वं घटपदकलशादिपदसाधारण्येन लाघवात् तत्राधे
यतासंबंधावच्छिन्नप्रकारत्वं कार्यताघटकसंबंध: स्वजन्यस्मृतिविषयत्वं च कारणताघटकसंबंध:
एवमाधेयत्वसंबंधावच्छिन्नघटप्रकारताकशाब्दत्वावच्छिन्नं प्रत्येव घटोपस्थापकनामोत्तरविभक्तिज्ञा
नत्वेन हेतुत्वं घटं घटेनेत्यादिसकलतृतीयादिसाधारण्येन लाघवात्॥ अत्रापि कार्यताघटकसंबंधो
विशेष्यता कारणताघटकश्च स्वजन्यस्मृतिविषयत्वं एतेन यत्र घटमानय कलशस्यानयनमित्येवं क्रमेण
घटपदोत्तरविभक्त्या कर्मत्वं कलशपदेन च घटं स्मरति न तु घटपदघटितपदाभ्यां घटकर्मत्वे तत्र कर्मताविशे
ष्यकघटप्रकारकशाब्दबोधप्रसंगइत्यपि निरस्तं॥ अथोक्तक्रमेण हेतुतायामपि यत्र तरत्सीत्यादे
र्घटकर्मत्वपरेण तत्पदेन घटकर्मत्वोपस्थितावस्तित्वादिप्रकारकस्तद्विशेष्यकान्वयबोधस्तत्र व्यभिचा
रो दुर्वार: न च वृत्त्या घटीयत्वेन कर्मत्वोपस्थितिजन्यत्वस्यापि कार्यतावच्छेदके निवेशान्नोक्तव्यभिचार इति
वाच्यं। तथा सति वृत्तिर्यंत घटपदतत्पदाभ्यां जनितस्य तादृशशाब्दबोधस्यासंग्रहापत्तेरिति चेन्न। कर्मत्वो

देश्यकघटविधेयकान्वयबोधत्वावच्छिन्नं प्रसिद्धोक्तरूपेण हेतुत्वस्य वाच्यत्वपोक्तदोषाभावात् तत्र्तदपि द्दजन्यताघटशाब्दबोधस्थले हि कर्मत्वांशेन घटस्य विधेयत्वे वह्निमत्पर्वतो धूमादित्याद्यनुमितौ पर्वते वह्नेरिव किंतु घटीयकर्मत्वांशे ऽस्तित्वादेरेव यत्र स्वातंत्र्येण वत्त्वाद्वयोरुपस्थितौ परस्परमन्वयबोधस्त त्रैवोद्देश्यविधेयभावस्यानुभवात् नचाप्यंशे शस्थलीयशाब्दबोधव्यभिचारः तत्रोक्तकारणबाधेनान्वय बोधानुपगमात् असंसर्गाग्रहादेव तत्र प्रवृत्त्याद्युपपत्तेः तत्र शाब्दबोधान्यत्वं वा कार्यतावच्छेदके तु प्रवे श्यं अत एव विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादिवाक्यात् … न्वयबोधस्वीकारेपि न तत्र व्यभिचा रः व्युत्पन्नपुरुषीयशाब्दबोधत्वस्यैव कार्यतावच्छेदकत्वादित्याहुः स्तन्त्रा पत्रघटार्थकपदानुत्तरवर्त्तिन एवा मपदस्योत्तरवर्त्तित्वसंबंधेन घटपदवत्त्वाश्रमेण कर्मत्वादित्यमत्ताघटीयं कर्मत्वमित्यन्वयबोधस्तत्र घटोपस्थापकनामोत्तरवर्त्तिन्याः कर्मत्वोपस्थापकविभक्तेर्ज्ञानविरहेण व्यभिचारस्तादवस्थ्यात् न चाव्यवहितोत्तरत्वसंबंधेन घटोपस्थापकनामप्रकारककर्मत्वोपस्थापकविभक्तिविशेष्यकज्ञानत्वे नैव कर्मत्वोद्देश्यकघटविधेयकान्वयबोधहेतुत्वोपगमान्नोक्तव्यभिचारावकाश इति वाच्यं गत्या सत्यव्यवहितोत्तरत्वसंबंधेन वाच्यवत्त्वमेयमित्यादिज्ञानादपि घटीयं कर्मत्वमित्यन्वयबोधापत्तेः तस्यापि वाच्यत्वादिरूपेण घटोपस्थापकनामाद्यवगाहित्वात् नच तादृशसंबंधेन घटोपस्थाप कनामत्वावच्छिन्नप्रकारताककर्मत्वाद्युपस्थापकविभक्तित्वाद्यवच्छिन्नविशेष्यताकज्ञानत्वेनैव हेतुत्वं तत्र वाच्यमिति वाच्यं घटमित्याद्यानुपूर्वीज्ञानविधुराणामपि तादृशसंबंधेन घटोपस्थाप कनामोत्तरकर्मत्वोपस्थापकविभक्तिरस्तीत्यादिज्ञानवतां घटीयं कर्मत्वमित्यन्वयबोधापत्तेः ॥

घटादिपदस्य घटोपस्थापकनामत्वं द्वितीयादेः कर्मत्वोपस्थापकविभक्तित्वमजानतोपि घटमित्यानु पूर्वीज्ञानमात्रात् घटीयं कर्मत्वमित्यनुभवस्य सर्वसिद्धत्वेन व्यभिचारतादवस्थ्याच्च ॥ अत्रोच्यते। घटमि त्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशिष्टायां कर्मताविशेष्यकघटाद्यन्वयबुद्धौ स्वप्रयोज्यघटाद्युपस्थि तिसंबंधेन घटमित्यानुपूर्वीज्ञानत्वेन कारणत्वं एवं कलशमित्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशि ष्टायां कर्मताविशेष्यकघटाद्यन्वयबुद्धावपि स्वादृशोपस्थितिसंबंधेन कलशमित्यानुपूर्वीज्ञानत्वेनेति रीत्या प्रत्येकमेवानुपूर्वीज्ञानस्य कारणत्वं वक्तव्यं वैशिष्ट्यं चैकक्षणावच्छेदेनैकात्मवृत्तित्वं एवं च घ टविशिष्टकर्मताबोधकत्वपदादिपदेनायमंशेन वाजनितायां घटीयं कर्मत्वमित्याद्यन्वयबुद्धावपि न व्यभि चारः तत्र बोधे उक्तरीत्या तादृशतादृशानुपूर्वीज्ञानत्वेनापि हेतुत्वांतरकल्पनात् तत एव तत्र तादृशबो धोपपत्तिः घटः कर्मत्वमित्यादिनिराकांक्षवाक्यस्थले च शक्तिज्ञानाद्यात्मकसामान्यसामग्र्याः स त्त्वेपि घटकलशमित्याद्यानुपूर्वीज्ञानात्मकविशेषसामग्रीविरहादेव घटीयं कर्मत्वमित्याद्याकारकान्व यबोधानापत्तिः अत एव पक्वापचतिघटो घट इत्यादिस्थलेपि ज्ञातयावद्विशेषसामग्रीविरहादेवना न्वयबोधः नतु तत्र प्रकारांतरमनुसर्त्तव्यं उद्देश्यतावच्छेदकविधेययोरैक्यस्थले भेदेन उद्देश्यविधेय योरैक्यस्थले चाभेदेनान्वयबोधस्यालीकत्वात् तत्र भेदेन तत्तदानुपूर्वीज्ञानस्य हेतुत्वांतराकल्प नात्। अत एव पचं चैत्रो गच्छतीत्यत्रेव पचति चैत्रो गच्छतीत्यादौ पाककर्तृत्वविशिष्टचैत्रो गति मत्त्वस्य नान्वयबोधस्तादृशानुपूर्वीकत्वज्ञानेन तथाविधान्वयबोधं प्रति हेतुत्वाभावात् आख्याता

न्या॰ को॰ र्थकत्वादेरुद्देश्यतावच्छेदकविधयान्वयबोधस्योदाहरणत्वासादन्यत्रैवावृत्युत्पन्नतयापोयरछ
२६ त्तिसत्त्वात्तेत्यादिस्थल एव रक्षणीयात्तथापकीकृतज्ञानत्वानित्याद्यन्वयबोधोदयेन तत्रतादृशानुपू
र्व्यंतर्गतविषयेहेतुत्वकल्पनानौचित्यात्तत्रान्वयबोधानुपपत्तिरित्यादिकमन्यत्रावयमकृष्टं। त्वमानयत्ति प्रा
पयतीत्यादौ धात्वाख्यातयोरन्वयस्थले त्यानयतीत्यानुपूर्वीज्ञानजन्यानयनाद्युपस्थितिविशि
ष्टत्वादिविशेष्यकानयनादिप्रकारकान्वयबोधे आनयतीत्याद्यानुपूर्वीज्ञानत्वेन धर्मेकरूपेण स्व
प्रयोज्यानयनाद्युपस्थितिसंबंधेन कारणत्वं ज्ञेयं न तु कृत्याद्यंशो विषयत्वादिसंबंधेनानयनपद
विशेष्यकान्वयबोधसामान्यं प्रत्येवानयनोपस्थापकधात्वुत्तरकृत्युपस्थापकप्रत्ययज्ञानत्वेन का
रणत्वमितिमत्तुमादरणीयं यत्रानयनार्थकधात्वनुत्तरवर्तिन एव नियत्तदुत्तरत्वभ्रमादानयनीया
कृतिरित्यन्वयबोधस्तत्र व्यभिचारप्रसंगात्। न चात्राव्यवहितोत्तरत्वसंबंधेनानयनोपस्थापकधा
तुप्रकारककृत्युपस्थापकप्रत्ययविशेष्यकज्ञानत्वेनैव तादृशान्वयबोधे कारणत्वान्नोक्तव्यभि
चार इति वाच्यं॥ प्रमेयत्वादिप्रकारेणापि तादृशधातुप्रकारकज्ञानादन्वयबोधापत्तेः। ननु कृत्यु
पस्थापकाख्यातत्वाद्यवच्छिन्नविशेष्यताकानयनोपस्थापकधातुत्वावच्छिन्नप्रकारताशालिज्ञा राम
नत्वेन तादृशान्वयबोधे कारणत्वात्कोनोक्तापत्तिरिति वाच्यं॥ आनुपूर्वीविशेषस्यान्यहेतावधेना २६
नादृशान्वयबोधापत्तेः। दूषणपत्तेश्चानुभवविरोधात्। धातुत्वाख्यातत्वाद्यग्रहेऽपि घटमानयती
त्यानुपूर्वीविशेषज्ञानमात्रादपि घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधोत्पत्त्या व्यभिचा

राच्च तादृशानुपूर्वीविशेषस्यान्वनिश्चयएव हेतुः तस्य संदेहे व्यतिरेकनिश्चये वान्वयबोधानुदयात् ए
वमग्रेऽपि द्वितीयाघटपदकर्मत्वादिकारकाणां धात्वर्थानयनादिक्रियायामन्वयबोधस्थले तु आनयत्वेति
धापयतीत्यादिप्रत्येकानुपूर्वीज्ञानजन्यानयनोपस्थितिविशिष्टे आनयन विशेष्यकघटकर्मत्वादि
प्रकारकान्वयबोधे आनयति क्षिपयतीत्यादिप्रत्येकानुपूर्वीज्ञानत्वेन हेतुत्वं एवं घटं कलशमित्यादि
प्रत्येकानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थितिविशिष्टे आनयन विशेष्यकघटकर्मत्वादिप्रकारकान्व
यबोधेऽपि प्रत्येकं घटं कलशमित्यानुपूर्वीज्ञानत्वेन हेतुत्वं बोध्यं अतो घटमानयतीत्यत्रेवानयति घटमि
त्यत्राप्यानयने धर्मिणि घटकर्मत्वस्यान्वयबोधः आनयति घटस्येत्यादौ घटमानयनमित्यादौ च न
तादृशान्वयबोधः उक्तहेतुद्वयस्याभावात् घटमित्यादिकर्मपदं विना नयतीत्यादिक्रियापदेन तादृशक्रि
यापदं विनान्यघटमित्यादिकर्मपदेन जनितस्यानयनविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोध
स्यालीकत्वयात्तदापत्तेरसंभवात् एवं क्रियाकारकांतरस्थलेऽपि तत्तत्क्रियाकारकपरतत्तभविषयेहे
तुत्वमूह्यं बोध्यं। केचित्तु घटमानयतीत्यानुपूर्वीज्ञानाव्यवहितोत्तरानयनविशेष्यकघटकर्मत्वा
न्वयबोधं प्रति तादृशानुपूर्वीज्ञानत्वेन हेतुत्वमेवमानयति घटमित्यानुपूर्वीज्ञानस्याप्युक्तरी
त्या हेतुत्वमपरं वक्तव्यमित्याहुस्तदसत् घटमित्यस्यानयतीत्यस्य च द्वयोः पौर्वापर्यस्य संदेहे तत
न्निश्चये तदंशे भ्रमत्वस्य संदेहदशायां वा घटमानयतीत्यानुपूर्वीज्ञानात्तादृशान्वयबोधानुत्प
त्तिप्रसंगात् यादृशानुपूर्वीज्ञानस्य हेतुत्वं तत्र निश्चयत्वस्यापेक्षितत्वात्तादृशानुपूर्व्यंशे भ्रमत्वज्ञा

मा॰कौ॰ नाभावस्यापि शाब्दधीहेतुत्वात्। एवं घटं पटं चानयतीत्यादावानयनविशेष्यकघटकर्मत्वादिप्रका
रकान्वयबोधोपपत्त्यर्थं तत्र सामग्र्यंतरकल्पने महागौरवप्रसंगश्चेति दिक्। वस्तुतस्तु क्रियाकार
१७ कोभयार्थान्वयेन विक्रियापदस्य कारकपदस्य च एकहेतुत्वद्वयं न कल्पनीयं नाम विभक्त्यो धात्वा
ख्यातयोश्चान्तर्भावेण क्वचित् सहेतुत्वादेव क्रियायां कारकस्यान्वयबोधसंभवात्। घटमित्यानु
पूर्वीज्ञानाव्यवहितोत्तरानयनादिक्रियाविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधं प्रति तादृशानु
पूर्वीविशेष्यकतात्पर्यादिज्ञानहेतुत्वस्यावश्यकत्वात् तत एव विशिष्टान्वयबोधसंभवात्। नन्वघट
माने तेन्याहितोपि सति तादृशतात्पर्यग्रहे तादृशान्वयबोधापत्तिरिति वाच्यं। आनयतीत्यानुपूर्वी
ज्ञानाव्यवहितोत्तरानयनादिक्रियाविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधं प्रति तादृशानुपूर्वी
विशेष्यकतात्पर्यादिज्ञानहेतुत्वस्यावश्यकत्वात् तत एव विशिष्टान्वयबोधसंभवात्। नन्वघटमा
नये त्यादितोपि सति तादृशतात्पर्यग्रहे तादृशान्वयबोधापत्तिरिति वाच्यं॥ आनयतीत्यानुपूर्वीज्ञा
नाव्यवहितोत्तरतादृशानुपूर्व्यन्वयबोधरूपस्य तद्विशेषस्य सामग्रीविरहादेवोक्तापत्त्यभावादिति सारः॥ राम
अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजकीयपुरुषबोधे तात्पर्यदशायां राज्ञः पुरुष इत्या १७
धानुपूर्वीज्ञानात् तादृशबोधोदयेन अंततस्तादृशानुपूर्वीज्ञानहेतुत्वस्य क्लृप्ततया राजकीयपुत्रबोधे ता
त्पर्यदशायां पुत्रो राज्ञ इत्यानुपूर्वीज्ञानात् तादृशबोधोदयेन पुत्रो राज्ञ इत्यानुपूर्वीज्ञानस्य राज
कीयपुत्रबोधे पुत्रकारीत्या हेतुत्वस्य क्लृप्ततया तादृशबोधे नियामकाभावः आनुपूर्वीरूपाकांक्षा

या निश्चयस्य पृथगेव नियामकत्वासंभवादिति चेन्न तादृशतात्पर्यज्ञानस्यैव तन्नियामकत्वात्। अपि
च मम पि घटमानयेत्यादिशाब्दबोधानंतरं झटिति पदार्थोपस्थितौ पुनस्तादृशशाब्दसमानाकारशाब्दापत्तिः सामग्र्याः
सत्त्वादिति चेन्न शाब्दबोधद्वयेच्छाविरहविशिष्टसमानाकारशाब्दबोधस्य शाब्दबोधे प्रतिबंधकत्वादेवो
क्तापत्त्यनवकाशात्। तादृशशाब्दद्वयेच्छासत्त्वे शाब्दद्वयस्योत्पत्तौ विवादाभावात्। तादृशेच्छाविरहवैशिष्ट्य
स्य प्रतिबंधकतावच्छेदककोटौ प्रवेशश्च वस्तुतस्तु उक्तप्रतिबंधकत्वे मानाभावः प्रथमशाब्दबोधक्षणे
तज्जनकपदज्ञानजन्यपदार्थोपस्थित्यादीनामन्यतमविनाशेन तादृशकारणविरहादेवाविरलक्र
मोत्पन्नशाब्दबोधधारायामापत्त्यसंभवात् अंतरा पदज्ञानतज्जन्यपदार्थोपस्थित्युत्पादस्य तेन पूर्वा
न्वयबोधस्य तादृशपदार्थोपस्थितिकाले विनाशात्तदुत्तरमन्वयबोधान्तरस्य सर्वमतएवावश्यकत्वा
त् यत्र प्रथमशाब्दबोधजनकपदार्थोपस्थितिरेवाकांक्षादिविषयिणी तत्र विनश्यद्वस्य तादृशस
मूहालंबनपदार्थोपस्थितितस्तादृशशाब्दबोधक्षणे पदार्थे पुनस्तादृशशाब्दबोधस्त्विष्टत एव शाब्द
बोधानंतरमेकशाब्दबोधोपगमे अनुभवविरोधविरहात् शाब्दबोधधारायाएवानुभवविरुद्धत्वादि
त्येव सारं॥ अथ तथापि घटः कर्मत्वमित्यादौ शाब्दबोधवारणाय घटमानयेत्यानुपूर्वीनिश्चयहे
तुत्वकल्पनापेक्षया घटः कर्मत्वमित्यानुपूर्वीज्ञानस्य प्रतिबंधकत्वमेवोचितमिति चेन्न घटः कर्मत्व
मित्यानुपूर्वीज्ञानसत्त्वेपि घटमानयेत्यानुपूर्वीज्ञानकाले शाब्दबोधोदयेन तादृशानुपूर्वीनिश्च
याभावविशिष्टघटः कर्मत्वमित्यानुपूर्वीज्ञानाभावहेतुत्वापेक्षया तादृशानुपूर्वीनिश्चयहेतुत्व
एव लाघवादित्यलमधिकेन। ननु वह्निनासिंचतीत्यादौ सेकं प्रति वह्निकरणकत्वस्य बाधयोग्यताऽनि

न्या॰ कौ॰ र्णयदशायामपि सैकेवह्निकरणकत्वादिशाब्दबोधापत्तिस्तदनीमुक्ताकांक्षाज्ञानघटितशाब्दसाम
२६ ग्र्यास्सत्त्वादितिचेन्न शाब्दबोधे योग्यताज्ञानस्यापि हेतुत्वोपगमात् । योग्यताच तद्धर्मावच्छिन्नविशेष्य
कतत्संसर्गकतद्धर्मावच्छिन्नप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नस्यतेन संसर्गेण तद्धर्मावच्छिन्नवत्त्वं एवं
चसेकोनवह्निकरणकइत्यादौ योग्यतानिर्णयकाले सेकत्वावच्छिन्नेवह्निकरणकत्वत्वावच्छिन्नाबाधा
न्निनस्सेकोवह्निकरणकइत्याद्याकारकस्ययोग्यताज्ञानस्याभावात्तस्यानोक्तशाब्दबोधापत्तिः । तस्याश्च
संशयसाधारणंज्ञानमात्रमेवहेतुः सर्वत्रशाब्दबोधात्पूर्वंयोग्यतायानिर्णेतुमशक्यत्वात् ननु वि
शिष्टबुद्धिसामान्येबाधनिश्चयाभावस्यहेतुतायाः क्लृप्तत्वात्तयैवायोग्यतानिर्णयदशायां शाब्दबो
धानुत्पादनिर्वाहेण शाब्दबोधेयोग्यताज्ञानत्वेन हेतुतायां मानाभावः अथप्रत्यक्षस्यलौकिकबाधनि
र्णयप्रतिबंधकतायामिच्छायाउत्तेजकत्वानुरोधेनचान्दत्वप्रत्यादेरेवप्रतिबंधकतावच्छेदकतयापरो
क्षस्थस्थलेइच्छाविरहमनिवेशपरत्वेनगेवबाधनिर्णयस्यप्रतिबंधकत्ववाच्यं । तत्रचनपरोक्षत्वजा
तेःप्रतिबंधकतावच्छेदकत्वंसंभवति तत्रमानाभावात् । अपितुप्रत्यक्षान्यज्ञानत्वस्यैवतच्चगुरु
नु५ शरीरमितिसेमितित्वशाब्दत्वयोरेवतत्वमुपेयमितितयोरेवबाधनिर्णयाभावजन्यतावच्छेदकत्वं
वाच्यंतथा तुलाघवात्शाब्दत्वावच्छिन्नेयोग्यताज्ञानहेतुत्वमेवसम्यक्बाधनिर्णयाभावहेतु
त्वेनिर्णयत्वप्रवेशेनगौरवात् । नच योग्यताज्ञानस्यसंशयसाधारणहेतुतायामप्रामाण्यनिर्णय राम
स्यैवोत्तेजकतयागौरवमेवेतिवाच्यं ॥ योग्यताज्ञानस्याहेतुत्वेप्यसत्त्वादौशाब्दसामग्रीप्रतिबंध २६
कतायाग्राह्याभावतत्प्रकारकत्वप्रत्यक्षतद्वच्छेदकधर्मदर्शनाभावकूटस्यनिवेशनीयतयागौर

र्वत्वहेतुत्वेचयोग्यताज्ञानस्यैकस्यैवाननिवेशनीयतयालाघवमितितद्धेतुत्वएवलाघवात् । नच
तद्धेतुत्वेपिसामग्रीप्रतिबंधकतायांतस्याभावानौतकरीत्यालाघवमितिवाच्यं । तत्रयाससतियो
ग्यताज्ञानश्रमकालेशाब्दबोधेतरसकलकारणस्सत्त्वेऽप्यतेशाब्दबोधेजायमानेऽसत्ताद्युत्पाद
पत्तिरितिचेन्नपरोक्षत्वजातेः पूर्वंकुस्थापितत्वात् किंच योग्यताज्ञानहेतुत्वेपितत्संदेहानंतरक्षणे
आहार्यवाक्यादितोयोग्यतानिश्चयेनुत्तद्वितीयक्षणेविनश्यदवस्थयोग्यतासंदेहात्शाब्दबोधवार
णायतत्रायोग्यतानिश्चयाभावस्यहेतुतायाआवश्यकत्वमितिचेदत्रकेचित् । योग्यताज्ञानस्यशाब्दधी
हेतुत्वेपयःकरणकत्वाभाववत्सेकीयादृतिरित्याद्याकारिकायांविशेष्यविशेषणभिन्नहेरीत्यामानसा
दिबुद्धौपयसासिंचतीत्याद्याकारकशाब्दसामग्र्याःप्रतिबंधकत्वाकल्पनेनलाघवंतथाहितादृशसाम
ग्रीकालेसेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वप्रकारकयोग्यताज्ञानरूपस्यतादृशमानसविप
रीतज्ञानस्यसत्तायाआवश्यकत्वेनविपरीतज्ञानोत्तरप्रत्यक्षनिर्णयहेतुभूतविशेषदर्शनस्यविरहेणै
वनतादृशमानसापत्तिसंभवति । सेकोनपयःकरणकइत्यादिप्रत्यक्षजनकीभूतसेकत्वावच्छिन्न
विशेष्यकपयःकरणकत्वाभावव्याप्यवत्तानिर्णयरूपविशेषदर्शनसत्त्वेवतदभावव्याप्यवत्तानिर्ण
यरूपप्रतिबंधकसत्त्वेनसेकत्वेनसेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वादिप्रकारकोपदर्शित
शाब्दसामग्रीवनास्तिनच संशये विशेषदर्शनस्याहेतुत्वयायोग्यतासंदेहइतिोपदर्शितशाब्दसा दर्शि२
मग्रीप्रतिबंधकत्वकल्पनमावश्यकमेवेतिवाच्यं ॥ सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वादि

न्या॰ कौ॰ प्रकारकमानसे तादृशशाब्दसामग्री प्रतिबंधकतायाउभयसिद्धतया सेकत्वादिविशिष्टेपर्यंकरण
२९ कत्वमानासंभवेन पर्यंकरणकत्वाद्यभावप्रकारकमानसेउपदर्शितसामग्रीप्रतिबंधकत्वाभावेपि
तादृशसामग्रीकालेसंशयापत्त्यसंभवात्॥ नच विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्शनस्य
हेतुत्व एवोक्तरीत्यालाघवं संभवतीति तत्रैव वचनमानमिति वाच्यं॥ उपदर्शितलाघवबलेनैव तस्या
पि सिद्धेः माभूद्वा विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्शनं हेतुस्तथापि योग्यताज्ञानहेतुता
मते योग्यताज्ञानाभावप्रकारकात्मविशेष्यकमानसप्रत्यक्षे शाब्दसामग्रीप्रतिबंधकत्वाकल्प
नप्रयुक्तलाघवं दुर्वारमेव ज्ञानाभाववति शिष्टबुद्धौ स्वरूपसतज्ज्ञानस्य प्रतिबंधकतायास्सर्वसि
द्धत्वादित्याहुः॥ अन्ये तु प्रयश्शुभ्रमित्यादिकविवाक्यादितो बाधितार्थस्यापि [illegible] योग्यताज्ञा
नादृष्यन्वयबोधोत्पत्तेरानुभविकतया बाधनिर्णयस्य न शाब्दबोधप्रतिबंधकत्वं नन्वेवं बाधि
तत्वेनावधारितेप्यर्थे शब्दप्रवृत्तिप्रसंगइति वाच्यं बलवता बाधेन तत्र शाब्दबोधेऽप्रामाण्यज्ञा
पनेनाप्रवृत्त्युपपत्तेः॥ तदुक्तं खंडनकारैः अत्यंतासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि प्रमाबा
धाद्भ्रमात्वमस्य तु प्रामाण्यं निर्लीयत इति॥ अस्यार्थः॥ अत्यंतासत्यपि बाधितत्वेनावधारितेपि
अर्थे विषये हि निश्चयेन शब्दः ज्ञानं करोत्येव द्वितीयहिशब्द एवकारार्थः नन्वेवं तत्र प्रवृत्त्या राम
पत्तिः तज्जनकस्य विशिष्टज्ञानस्य सत्वादत आह॥ प्रमेत्यादि तत्र बाधितार्थे प्रमाबाधाद्भ्रम २९

या॰ अयोग्यताप्रसंगे याबाध्या प्रमात्वेन ज्ञाप्या अप्रमा भ्रमात्मकशाब्दबुद्धिरेव भवतीति शेषः तावतापि किंजात
मत आह॥ अलमिति प्रवृत्तिप्रयोजकइति शेषः तथा च प्रवृत्तिप्रयोजकप्रामाण्यनिर्णयाभावान्न तत्र प्रवृत्तिरिति
भावः॥ तन्नैवं योग्यताज्ञानहेतुत्वमप्यफलं बाधनिर्णयदशायां शाब्दधीवारणायैव तत्स्वीकारादिति वाच्यं
बाधनिर्णयदशायामपि बुभुत्सितस्यैवार्थस्यान्वयबोधानुभवात् बुभुत्सितस्य मूलभूतस्य योग्यताज्ञानहेतुतामंतरे
ण निर्वाहात् योग्यताज्ञानहेतुत्वे आहार्ययोग्यताधीनिर्वाहकतया बुभुत्सोपगमात्॥ नच शाब्दबोधएवाहा ती
र्यः स्वीक्रियतां तावतैव बुभुत्सोपयोगसंभवे किं योग्यताज्ञानस्य हेतुत्वेनेति वाच्यं॥ परोक्षज्ञानमात्रे हार्यत्वेनेव
त्तिसिद्धांतविरोधात्॥ तथा सति शाब्दे प्रागिव विशिष्टबाधनिर्णयाद्यभावस्य हेतुतायाउपगंतव्यतया गौरव
प्रसंगाच्च॥ नच तत्र तत्र शाब्दबोधहेतुतया निमित्ताकांक्षायोग्यतासत्त्याहार्यमानसप्रत्यक्षादेव शाब्दबोधकार्योप
पपत्तेः॥ शाब्दबोधे प्रामाणिक इति वाच्यं॥ श्रुतोपमर्थ इत्यनुभवस्य प्रत्यक्षेणानिर्वाहात् शाब्दजन्यता कार्थविषय
कबोधस्यैवार्थविशेषादिबोधजनकत्वाच्च॥ अन्यथा बाधितार्थककविवाक्यादेः आकांक्षादेरुपयोगप्रसं
गादित्याहुः॥ अपरे तु यत्र यत्र विषये योग्यताज्ञानघटितशाब्दबोधसामग्रीदशायां कदापि कस्य विरोध
ग्रि निर्णयो न जातस्तत्र बाधावतारदशायां शाब्दबोधवारणाय योग्यताज्ञानहेतुतेत्यूचिवांसः उक्तलाघवादित्याहुः
रितिदिक्॥ अधिकमस्य च बोध्यं विस्तारभयादत्र नोक्तं॥ ते निर्युक्तमग्निमान् देवदत्तेनेत्याकुतो गिरिरग्निमान्
देवदत्तकर्तृकभोजनमित्यादिशाब्दबोधवारणाय सत्तेरपि शाब्दबोधहेतुत्वमुपेयं॥ अथ केयमासत्ति
मूर भावादुक्तस्थलेनोक्तरीत्या शाब्दबोध इति केचित्॥ एकपदार्थोपस्थित्यव्यवधानेनापरपदार्थोप
स्थितिरेवासत्तिः उक्तस्थले यो ज्ञारणक्रमेणपदार्थोपस्थित्यादिर्यक्तिपदाद्युपस्थितेरव्यवधानेनावा

न्या·कौ· ऽासत्तिः नन्वेवं गिरिरग्निमान् नीलो घटादावप्यासत्त्यनुपपत्तिः तत्र पदज्ञाने नार्थोपस्थित्योर्व्यवधानादिति वा
२० च्यं। अत्र गिर्युपस्थितिरेवाग्निमत्पदविषयिणी तत्रैवासत्तेरुपगमात् अन्यत्रासत्तिभ्रमेणैव शाब्दबोधोप
गमात् वस्तुतस्तु प्रकृतान्वयबोधानुकूलत्वेनाव्यवधानाभाव एव अव्यवधानं उक्तस्थले च पदज्ञानद्वारा
स्य प्रकृतान्वयबोधानुकूलत्वान्न दोषः अत एव काष्ठैः स्थाल्यामोदनं पचतीत्यादौ कारककरणकत्वयोः
रुपस्थित्योः स्थाल्याद्युपस्थितिद्वारेण नव्यवधानेपि क्षतिः तस्य प्रकृतान्वयबोधानुकूलत्वात् यत्र च गि
रिर्भुक्तमित्यादौ भुक्तपदार्थोपस्थितौ गिरिपदस्य तदर्थस्य वा पुनर्ज्ञानं तत्रासत्तिरेव। ननु गिरिर्भुक्तमग्निमा
देगिर्युपस्थित्यग्निमदुपस्थित्योर्भुक्तपदस्यानाभावात्पदार्थोपस्थितिरूपकारणविरहादेव न शाब्दबो
धापत्तिः न च यत्र क्रमिकोपस्थितिस्तत्र समूहालम्बनतावत्पदस्मरणात् समूहालम्बनतावदर्थोपस्थिति
स्तत्र शाब्दबोधापत्तिरिति वाच्यं। तत्र समूहालम्बनोपस्थितेः स्वात्मकार्यान्तरोपस्थितव्यवधानसत्त्वे
नासत्तिसत्त्वादासत्तिहेतुत्वाप्यनिर्वाहेणापत्तेरेव श्रवणीकरणीयत्वादिति चेन्न। नेदं घटितासत्तिव्यवधा
नस्यैवासत्तिघटकत्वात् समूहालम्बनोपस्थितेरासत्तित्ववारणायैवासत्तेर्हेतुत्वोपगमस्यावश्यकत्वात्
इत्याहुः तदसत्। उक्तासत्तेः स्वरूपसत्या हेतुत्वं ज्ञातायावानाघः आसत्तिभ्रमेण शाब्दबोधानुपपत्तेः
नांस्मः उपस्थितीनामनुपस्थितावपि शाब्दबोधस्यानुभविकत्वात्। वस्तुतस्तु निरुक्तासत्तेः शाब्दबो
धोपयोगित्वे मानाभावः गिरिरग्निमत्तोरन्वये तात्पर्यज्ञानाभावादेव तयोरन्वयबोधानुदयात् तत्सत्त्वे वस्त राम
पत्तेः अत एव श्लोकादौ तात्पर्यग्राहकतया योजनाया उपयोगः यत्र च प्रकारान्तरेण तात्पर्यग्रहस्तत्र २०
योजनां विनैव शाब्दबोधः। एतेन तत्तत्पदयोरव्यवधानमेवासत्तिः तस्याश्च ज्ञानमेव शाब्दबोधजनक

अवरुत्तात्स्यर्थमपि परानाव्यवधानभ्रमेण शाब्दबोधात् अत्रापि प्रकृतान्वयबोधानुकूलत्वेन
नन्तरितत्वं निवेशनीयं अतो न काष्ठैः स्थाल्यामोदनं पचतीत्यादावनुपपत्तिः मौनिनाः अव्यवधानेन लि
खितानां पदानामासत्तिभ्रमादेव शाब्दबोधः स्वः स्यात्स्वा अवरुत्तत्वादिकपदोपस्थाप्ययोः कृतिवर्तमान पि॰
तयोः परस्परमन्वयबोधः अथवा तत्रासत्तिज्ञानस्य हेतुत्वे तेन कल्प्यते प्रयोजनाभावात् काव्यादौ अन्वययोज
नाभावादेव शाब्दबोधः अत एव तत्र योजनाया अप्युपयोगस्य विपरासत्तं। तात्पर्यग्रहेणैव निर्वाहे निरुक्ता
सत्तेरपि हेतुत्वे मानाभावात्। अत्र वदन्ति। पदजन्यज्ञानजन्यपदार्थोपस्थितिरेवासत्तिः स्मान्वस्वरूपसत्ते
वोपयुक्ता अगृहीतवृत्तिकस्य पदज्ञानादिसत्त्वेपि शाब्दबोधानुदयात्। सा च स्मृतिरूपा आसा तत्तद्वृत्ति
ज्ञानस्योद्बोधकविधया हेतुत्वात् तेन शक्तिलिङ्गकानुमानजन्यानुमित्यात्मकपदार्थोपस्थितौ न शाब्द
बोधः न चैवमवान्तरवाक्यार्थबोधस्यासंग्रहेण घटमानयेत्यादाववान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थ
बोधानुपपत्तिरिति वाच्यं। तत्रानयनाद्युपस्थापकचरमपदज्ञानस्यैव घटादिपदविषयकसमूहालम्बन
रूपतोपगमेन तज्जन्यानयनादिस्मृतेश्च घटादिविषयकसमूहालम्बनत्वोपगमेन विशेष्यविशेषण
मितिरीत्यैव शाब्दबोधोपगमेनावान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधानुपगमात्। एवं च सर्वत्र स्व
लेकपोत्पन्यायेनैव शाब्दबोधः यत्तु। अवान्तरवाक्यार्थबोधस्यापि महावाक्यार्थबोधहेतुतया यत्रावान्तर
वाक्यार्थबोधस्तत्र विशिष्टस्य वैशिष्ट्यमितिरीत्या महावाक्यार्थबोधः यत्र च स नास्ति तत्रोक्तस्मृतितो विशे
ष्यविशेषणमितिरीत्या बोधः एवं च क्वचिन्नजपुरघवेशान्यायेन क्वचिन्न स्वलेकपोत्पन्यायेन शाब्दबोध इति
मतं तदसत्। उक्तरीत्या सर्वत्रोक्तस्मृतिरूपैकविधसामग्र्यैव निर्वाहे अवान्तरवाक्यार्थबोधस्यप्रमत्वा।

न्या. कौ. वाक्यार्थबोधहेतुत्वे मानाभावात् क्वचित्स्मृतिघटितत्वेन क्वचिच्चावांतरवाक्यार्थबोधघटितत्वेन महावा
क्यार्थबोधसामग्र्या भेदेन समानविषयकानुमित्यादौ महावाक्यार्थविषयकशाब्दसामग्रीप्रतिबंध
२१ कताधिक्यप्रसंगाच्च। ननु। विनिगमनाविरहः सर्वत्रावांतरवाक्यार्थबोधरूपैकसामग्र्यैव वृत्तिनिर्वाहोपग
मादिति वाच्यं। अवांतरवाक्यार्थबोधानुरोधेनोक्तस्मृतिरूपसामग्रीकल्पनावश्यकत्वस्यैव विनिगमक
त्वादिति॥ अथ पदवृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन शाब्दबोधहेतुत्वे यत्र द्वारकर्मकपिधानतात्पर्येण
द्वारमित्येवोक्तं तत्र तादृशबोधानुपपत्तिः पदवृत्तिज्ञानजन्यपिधानोपस्थितेरभावादिति चेन्न॥ तत्रोक्त
तात्पर्यानुरोधेन पिधेहीत्यादिपदाध्याहारकल्पनात्॥ यत्र च न तादृशपदाध्याहारसामग्री तत्र मानस
स्यैव तादृशबोधस्योपगमे शाब्दबोधस्यैवानुपगमात्॥ गुरवस्तु पदार्थोपस्थितिमात्रं शाब्दबोधजनकम
नुपदवृत्तिज्ञानजन्यत्वं हेतुतावच्छेदकं गौरवात् प्रमाणाभावाच्च॥ एवं चोक्तस्थले पिधानाद्यर्थाध्याहारादे
व तादृशबोधोपपत्तौ न पदाध्याहारः कल्पनीयो मानाभावात्। न च घटादिपदाश्रयत्वादिसंबंधेनोपस्थि
तानामाकाशादीनां शाब्दबोधवारणाय पदवृत्तिज्ञानजन्यत्वस्य पदार्थोपस्थितिजनकतायामवच्छेदकत्वमा
वश्यकमिति वाच्यं॥ तत्र तात्पर्यग्रहे तादृशशाब्दबोधेष्टापत्तेः अन्यथा तात्पर्यग्रहाभावादेव शाब्दबोधा
भावोपपत्तेः। अथैवं यत्र द्वारकर्मत्वपिधानादीनां सर्वेषामेवार्थादीनां प्रकारांतरेणैवोपस्थितिर्न तु प्रकृ राम
तवाक्यार्थघटकार्थोपस्थापकस्य कस्यापि ज्ञानमस्ति तत्रापि द्वारकर्मकपिधानादिशाब्दबोधप्रसंगः २१
स्यात्। यत्र प्रकृतवाक्यार्थघटकानां द्वारकर्मत्वपिधानादीनां सर्वेषामेव लाक्षणिकपदादुपस्थितिस्तत्र
न्यायमतेपि लाक्षणिकपदस्यानुभावकत्वेन शाब्दबोधस्तदुपपत्तये वक्तव्ये तद्विशिष्टार्थबोधशक्तिमा

ज्जन्यत्वं तद्विशिष्टार्थघटकतावच्छेदकधर्मावच्छिन्नोपस्थितित्वेन हेतुतावश्यमुपेया एवं च तादृशकारणविरह
देव नोक्तस्थले शाब्दबोधप्रसंग इति। न दुष्टं सर्वत्र लाक्षणिकस्थले शाब्दबोधस्येष्टत्वात्। लाक्षणिकेनानुभा
वकमिति नियमे मानाभावात्। अत एव धूमादित्यत्र हेतुवाक्ये धूमपदस्य धूमज्ञाने पंचम्याश्च ज्ञाप्यत्वे लाक्षणिक
त्वेपि शाब्दबोध इति चेन्मैवं न्यायमतस्वारस्यात् चिरपि पदवृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन हेतुतामुपग
म्यैव सर्वपदाश्रवणे शाब्दप्रसंगवारणं तत्। नन्वेवं सर्वपदाध्याहार आवश्यक इति वाच्यं॥ प्रकृतवाक्यार्थ
शाब्दबोधप्रयोजकमात्रपदवृत्तिज्ञानजन्यत्वं किंचित्पदार्थोपस्थितेः इतरपदार्थानां चोपस्थितिसा
मान्यस्य निवेशेन सर्वपदाध्याहारं विनैव निर्वाहादिति वदंति। तन्न। निराकांक्षदशजन्यपदार्थोपस्थितिकाले शा
ब्दबोधवारणाय साकांक्षतयाज्ञातपदावगाहिज्ञानस्य हेतुतायास्तत्रावश्यकतया पदाध्याहारस्यावश्य
कत्वात्। किंच। तदुद्देश्यकतद्विधेयकान्वयबोधे तदुपस्थापकपदान्तरत्वेन तदुपस्थापकपदानुसंधानस्य नि
यामकतया द्वारकर्मत्वारोपि पिधानादिविधेयकशाब्दबोधानुरोधेन द्वारमित्याद्युपदोत्तरं तत्पिधानाद्युपस्था
पकपदानुसंधानमावश्यकं। अत एवोद्देश्यवाचकपदविधेयवाचकपदयोः पौर्वापर्यरूपाकांक्षाया अप्यु
पयोगः। न चोद्देश्यविधेयभावेन शाब्दबोधानुरोधेन पदाध्याहारकल्पनेपि विशेष्यविशेषणभावमात्रेण
शाब्दबोधस्यार्थाध्याहारादेवोपपत्तेर्न तत्र पदाध्याहारापेक्षेति वाच्यं॥ अनुमितेरिवोद्देश्यविधेयभावानि
रूपकस्य शाब्दबोधस्याप्रामाणिकत्वात्॥ अन्यथा तादृशशाब्दबोधोपगमे तद्धीसामग्र्या ज्ञानांतरप्रति
बंधकताया आधिक्यप्रसंगात्॥ यत्तु पदज्ञानजन्यपदार्थोपस्थितिजन्यशाब्दबोधे उद्देश्यवाचकपदवि

न्या. कौ.
२२

धेयवाचकपदयोः पौर्वापर्येणानुसंधानं उद्देश्यविधेयभावनियामकं अर्थाधाराधीनशाब्दबोधेच
तात्पर्यविशेषज्ञाननियामकमिति ॥ तन्न । तथासत्येकविधबोधस्यैवसामग्रीभेदात्तत्सामग्रीप्रतिबंधक
तावच्छेदकः स्वीं पर्यायापन्नपदविषयकज्ञानजन्ययोरुद्देश्यविधेयोपस्थित्योरेतन्मतेप्येकत्र निवेशेन
यत्तयोक्तलाघवासंभवात् । न ह्यस्तु सर्वेषां पदतदुपस्थितावपि सर्वेषां पदानुपस्थितावपि शाब्दबोधो जा
यते । अर्धजरतीन्यायस्यैवानुपगमात् । अत एव पश्यतः श्वेतमालम्ब्य हेषाशब्दं च शृण्वतः खुरविक्षेपश
ब्दं च श्वेतोश्वो धावतीति धीरित्युक्तं संगच्छते । अत्र हेषाश्रवणखुरविक्षेपशब्दश्रवणाभ्यां श्वेतधावनयोर
नुमितात्मकोपस्थिते । एवं च पदज्ञानजन्यार्थोपस्थितिविशिष्टशाब्दबोधत्वाच्छोपस्थितित्वेन पदज्ञान
जन्यार्थोपस्थितिविशिष्टशाब्दबोधत्वतादृशोपस्थितित्वेन हेतुता एकोपदज्ञानजन्ययावदर्थोपस्थितिघ
टिताः परान्वतद्जन्ययावदर्थोपस्थितिघटितशाब्दसामग्री द्विधा पदज्ञानजन्यपत्तिं किंचिदर्थोपस्थिति
तदजन्यार्थोपस्थितिघटिताच सामग्रीनास्त्येवेति केषांचित्पक्षे केषांचित्प्रकारांतरेणोऽर्थोपस्थितौ न
शाब्दबोध इत्याहुः । स्तदपिन । पश्यत इत्यादौ कथंचिदनुमानादित एव श्वेतोश्वो धावतीत्यादिबोधनिर्वा
हे द्वितीयसामग्रीकल्पने मानाभावात् । तादृशबोधानंतरं शाब्दयामीत्यनुव्यवसायस्यासिद्धत्वादिति
दिक् । नन्वनानार्थकसैंधवादिपदस्थलेयत्रैकपदाल्लवणतुरगादिनानार्थोपस्थितिस्तत्र सर्वेषामेव शा
ब्दबोधापत्तिरतः कुतोज्ञानादिघुरिति शाब्दबोधसामग्रीसत्वादिति चेन्न । तात्पर्यनिर्णयस्यापि शाब्द
बोधसामान्ये हेतुतया यत्रार्थे तात्पर्यनिर्णयस्तस्यैव शाब्दबोधोदयेनोक्तापत्त्यसंभवात् ॥ नन्वस्वरूप

साध॰
राम
२२

य

सत्तात्पर्यमेव शाब्दबोधे हेतुरस्त्विति वाच्यं । तथासति तात्पर्याविषयस्य तात्पर्यभ्रमेण शाब्दबोधानु
पपत्तेः । मैवं नन्वेवमपि नानार्थकस्थले तात्पर्यनिर्णयहेतुत्वेपि शाब्दसामान्ये तस्य हेतुत्वे मानाभाव इति चेद
त्राहुः । लवणादिशक्तनानार्थकसैंधवादिपदस्थले लवणादितात्पर्यज्ञानस्य हेतुत्वकल्पनापेक्षया सैंधवा
दिपदजन्यलवणादिशाब्दत्वस्य कार्यतावच्छेदकत्वे गौरवेण सैंधवादिपदजन्यलवणादिशाब्दत्वमेव कार्यता
वच्छेदकं लाघवात्तत्र लक्षणया शक्तिभ्रमेण वा घटादिपदजन्यलवणादिशाब्दबोधसाधारण्यमिति तत्रापि त
त्कारणत्वं निर्व्यूढं । एवं यत्र शक्तिभ्रमेण सैंधवादिपदेनैव घटादयो बुधस्याप्यं तेन तत्रैव घटादितात्पर्यज्ञा
नस्यापि कारणत्वं सिद्धं ॥ एवं लक्षणस्थले शक्तिलक्षणाभ्यां शक्यलक्ष्यार्थयोरुपस्थितौ लक्ष्यार्थस्यैव
शाब्दबोधो न तु शक्यार्थस्येति नियमनिर्वाहाय लक्षणायेव नानालक्ष्यार्थोपस्थितावेकस्यैव लक्ष्यार्थ
स्य शाब्दबोधनिर्वाहाय च तात्पर्यनिर्णयहेतुत्वमावश्यकमिति सर्वत्र शाब्दबोधे तस्य हेतुत्वसिद्धिरित्यत
एव तात्पर्यानुपपत्तिर्लक्षणाबीजमिति प्रवादोपि संगच्छत इति । तात्पर्यं च तत्प्रतीतीच्छयोच्चरितत्वमेव
उच्चरितत्वं च ज्ञापितत्वं मौनिश्लोकादिसाधारणं तच्च पदज्ञानानुकूललिप्यादिव्यापारमादाय तात्पर्य
निर्वाहः । न च यत्र सैंधवपदं लवणप्रतीतिर्भवतु तुरगादिप्रतीतिर्न वा भूदिति सम्भूयालवणेच्छया
सैंधवं पदमुच्चारितं लिखितं वा तच्च सैंधवपदस्यानयतात्पर्यकत्वात् युगपदुभयशाब्दबोधापत्तिर्दुर्वारे
ति वाच्यं । तदर्थावच्छिन्नस्वजन्यत्वप्रकारकत्वेनेच्छाया विशेषणीयत्वात् । न च यत्रैकपुरुषस्यैव तदर्थ
प्रतीतीच्छया पदमुच्चारितं लिखितं वा तत्रान्यपुरुषस्यापि तदर्थशाब्दबोधापत्तिरिति वाच्यं ॥ न

न्या·कौ· जात्यपुरुषस्य शाब्दबोधाभावे तात्पर्यस्य पुरुषभेदनियंत्रितत्वाभ्युपगमे नापत्त्यभावात्। ननु च शुका
दिवाक्यात् कथं शाब्दबोधस्तत्र तात्पर्याभावादिति वाच्यं॥ तत्र तात्पर्यभ्रमादेव शाब्दबोधात् विशेषदर्शि
२३ नां तु पदार्थोपस्थितिमूलकमानसबोध एवोत्पद्यते न तु शाब्दबोधस्त्वभ्युपगमात्। ननु तथापि सर्वपदानामा २३
नवेदात् शाब्दबोधानुपपत्तिः तत्र मूर्खस्यार्थज्ञानाभावेन निरुक्ततात्पर्याभावादिति वाच्यं॥ तत्रापदा
मूर्खपदस्य मानवे देवेश्वरोच्चरितवेदयोरन्यतरभ्रमेण निरुक्ततात्पर्यभ्रमस्तत्र शाब्दबोधः तादृश
भ्रमासत्त्वे च वेदत्वसामान्यलक्षणया ईश्वरोच्चरितवेदज्ञानादेव शाब्दबोधस्याभ्युपगमात्॥ ननु च
कपिंजलानालभेतेत्यादौ च तुल्यादिप्रतीतीच्छया प्रयुक्ताधुनिकेन बहुवचनमुच्चारितं तत्र बहुवच
नादेश्च तुल्यादौ तात्पर्येण तस्य शाब्दबोधापत्तिरिति वाच्यं॥ वेदत्वेन ज्ञायमानवाक्यजन्यशाब्दबो
धे न्यायगम्यतात्पर्यनिर्णयस्य हेतुत्वोपगमात्। न्यायगम्यतात्पर्यं च न च तुल्यादौ तस्यावेदार्थत्वा
त् न्यायश्च लाघवज्ञानादिरूपः तत्र बहुवचनस्य सामान्यतो बहुत्वग्राहकप्रमाणेन बहुवचनस्य
त्रित्वपरत्वे लाघवमित्याकारकलाघवज्ञानसहकृतेन त्रित्वपरत्वं परिच्छिद्यते इति तत्र तात्पर्यं न्या
यगम्यकपिंजलचतुष्टयालंभनस्य वेदार्थत्वे अधिकार्थालंभनमधिककार्यकारणाभावस्य चक राम
ल्पनायां गौरवेण त्रित्वपरत्वे लाघवनिर्वाहः अधिकं प्रागेवोक्तं॥ ननु सैंधवादिपदजन्यलवण २३
अर्थविषयकशाब्दबोधे सैंधवादिपदधर्मिकलवणादितात्पर्यनिर्णयस्य हेतुत्वेपि घटदर्शनानुलवणा
नयनादितात्पर्यकात् घटं परस्परं सैंधवमानयेत्यादिवाक्यात् लवणादर्शनादिबोधापत्तिर्दुर्वारा लव

णदर्शनाद्योरिव सैंधवादिपदस्य तात्पर्यानिर्णयसत्त्वात्। ननु लवणदर्शनाद्योः परस्परमन्व
यबोधे तद्दर्शकपदयोरेकवाक्यताभिप्रायविषयत्वरूपसमभिव्याहारज्ञानस्यापि हेतुतया तद
भावान्नोक्तापत्तिरिति वाच्यं॥ तादृशहेतुत्वे मानाभावात्। तादृशहेतुतामतेपि लवणलक्षणतुरगा
द्यानयनतात्पर्यकात् सैंधवं कलयतीत्यादिवाक्यात् तुरगलक्षणलवणानयनाद्योरन्वयबोधस्य
दुर्वारत्वाच्च॥ ननु तदर्थशाब्दबोधे तदर्थान्वितस्वतदर्थतात्पर्यनिर्णयस्य हेतुत्वान्नोक्तदोष इति वाच्यं॥
त्यासत्तिएकपदार्थान्वितापरपदार्थस्य वाक्यार्थरूपतया तस्य शाब्दबोधात्पूर्वमप्रतीत्या तदन्वितत्वतात्प
र्यनिर्णयस्यैवासंभवात्। अथ पदपदार्थत्वेन पदार्थद्वयविषयकस्य सैंधवपदसमभिव्याहृततापरपदा
र्थान्वितस्वार्थपरमित्याकारकस्य सामान्यत एकपदार्थविशेषतश्चापरपदार्थमवगाहमानस्य
सैंधवपदं पदार्थान्तरान्वितं तुरगादिपरमित्याकारकस्य वा तात्पर्यनिर्णयस्य हेतुत्वोपगमान्न दो
ष इति चेन्न सैंधवं कलयतीत्यादौ तुरगानयनानुगुणान्वयबोधानुरोधेन तादृशतात्पर्यनिर्णयस्याप्या
वश्यकतया तद्बलेन तुरगलक्षणान्वयबोधापत्तेर्दुर्वारत्वात्॥ तुरगान्वयबोधवत् तुरगलक्षणान्वय
बोधेपि तादृशतात्पर्यज्ञानस्य हेतुत्वात्॥ ननु च तुरगलक्षणान्वयबोधे किंचित्पदमितरपदार्थान्वि
तलक्षणपरमित्येतादृशतात्पर्यनिर्णयस्याधिकस्य हेतुत्वान्न दोष इति वाच्यं॥ लवणलक्षणान्व
यबोधेपि तादृशतात्पर्यनिर्णयहेतुतया तदनुरोधेन तस्यावश्यकतया तद्धेतुतयोक्तापत्तिवारणसं
भवादिति चेन्नैवं। कर्मत्वादिविशेष्यतानिरूपिताधेयत्वादिसांसर्गिकविषयतानिरूपितल

न्या॰कौ॰ वृषणादिप्रकारकताशालिशाब्दबोधे तादृशप्रकारताशालिप्रतीतिर्भवितव्या प्रकारकनिर्णयस्य हेतुत्वोपग
२४ मेन तादृशज्ञानस्य विशिष्यपदार्थद्वयावगाहित्वेपि विषयतांश एव तत्तत्पदार्थप्रकारकत्वाएकमद
र्थेऽपरपदार्थांशे प्रकारकत्वेन चावगाहित्वे तादृशशाब्दबोधास्वर्वतसंभवात्। केचित्तु। तात्पर्य
ज्ञानं न हेतुः नानार्थस्थले तात्पर्यविषयस्यैव शाब्दबोधनियमस्तु एकतत्पदार्थशाब्दबोधे अ
न्यतत्पदार्थतात्पर्यज्ञानस्य प्रतिबंधकत्वोपगमादनीयः। एवं चतत्पदार्थतात्पर्यज्ञानदशायां मुख्यार्थ
स्य शाब्दबोधासंभवेन लक्षणावृत्तेः कल्पनमिति संगच्छते। अतएव तात्पर्यज्ञानविरहदशायां शाब्द
बोधोप्येकपि न क्षतिरित्याहुः। तदसत्। तात्पर्यज्ञानस्य प्रतिबंधकत्वेऽनपेक्षतत्सत्त्वेनुभवसिद्धस्योभ
यशाब्दबोधस्यानुपपत्तेः। एकतात्पर्यज्ञानप्रतिबंधकतायामपरतात्पर्यज्ञानस्योत्तेजकत्वे गौर
वात्॥ अन्ये तु एकत्र तात्पर्यज्ञानमपरपदार्थोपस्थितिं प्रति प्रतिबंधकं। एवं च नानार्थस्थले ता
त्पर्यविषयपदार्थोपस्थितिकल्पनालाघवं तत्र यत्र तात्पर्यग्रहस्थलेन एकतात्पर्यग्रहनाशो सत्ये
वापरपदार्थोपस्थित्या शाब्दबोधस्तु तदसत् यत्रैकपदार्थोपस्थित्यनंतरं तदुत्पत्तिकाले
वाऽपरपदार्थतात्पर्यज्ञानं तत्र शक्त्या पदोपस्थितेरसत्त्वेन शक्तिसंबंधात्मकलक्षणाग्रहासंभवा
च्च। अन्वयबोधं॥ सैंधवमानयेत्यादौ लवणतुरगादिनानार्थेयत्र तात्पर्यग्रहस्तत्र द्वितीयार्थशाब्द राम
बोधःप्राचांमते आवृत्त्यैव संभवत्युद्भवितः शब्दः सकृदेवार्थं गमयतीति न्युक्तेः तदनंगीकर्तनव्य २४
मते त्वावृत्तिं विनैकदैव नानार्थबोधस्तत्र मतद्वयस्याप्यार्थमित्यवर्णं संयुक्ताः तत्र प्राचामयमा

य

शयः नानार्थस्थले यत्र पानानार्थादिशाब्दविषयकैकानुसंधाने नैकार्थपरत्वापकत्वमकारिका
वक्तुरिच्छा न संभवति सकृदुच्चरितइत्यादिनियमबलेन स्वसमानार्थकपदांतरानुसंधानासंभव
त्तितस्य पदानुसंधानस्य नानास्वार्थबोधकत्वविरहेण तत्र तादृशशाब्दसाधकत्वस्य बाधात् नचता
दृशनियमे मानाभावइतिवाच्यं॥ तथा सति एकपदानुसंधाने युगपन्नानास्वार्थबोधकत्वस्य पूर्व
रतया तत्र वाक्यभेदव्यवहारानुपपत्तेः वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदव्यवहारप्रयोजकत्वा
त्॥ एवं चैकोक्तिगर्भतात्पर्यानावच्छिन्नानार्थकशब्दात् युगपदनेकार्थप्रतीतिः एकानुसंधानात्मीवे
णानेकार्थप्रत्यायनेच्छागर्भं तु तात्पर्यमादृत्याक्रमो स्वपन्नानार्थबोधेनापि च्छेदितार्थं भवतीति त
त्रावृत्त्यैवापरार्थोत्तरबोधः। ननु सकृदुच्चरितइत्यादिनियमो न संभवति घटाइत्यादावेकघटपदानुसं
धानादप्यनेकघटादिबोधोदयेन व्यभिचारात्। यत्तु। तत्रैकशेषेण सरूपपदांतरलोपात्तत्प्रति
संधानादेव नानाघटादिबोधः तथा च तत्रपरानुसंधाने समानार्थकपदानुसंधानासंभवात्तत्व
रूपविशेषणमेव नास्तीति नोक्तनियमव्यभिचारः अतएवैकशेषानुशासनस्यापि सार्थकत्वं अ
न्यथा एकेन पदेनानेकघटादिबोधसंभवे ऽनेकघटादिपदप्रयोगाप्रसक्त्या सरूपपदांतरलोप
विधायकतदनुशासनवैयर्थ्यापत्तेरिति॥ तदसत्॥ एवमपि घटानानयेत्यादितः आनयनक्रिया
देरेकेन आङ्पूर्वनीधातुरूपपदेन बोधनेन व्यभिचारस्य दुर्वारत्वात्॥ न च जातिपदिकरू
पपदमंतर्भावितया नियमे न दोषइतिवाच्यं॥ तथा सति घटं पटं चानयेत्यादौ एकेनापि क्रियाप

न्या. कौ. देननानानयनादिबोधनसंभवेनश्चांतत्वावृत्तिस्वीकारविरोधात्। अत एवैकपदानुसंधा
नेनानावृत्तिविषयाबोधकत्वनियमस्वीकारेपि न निर्वाहः। उक्तस्थले घटपटानयनयोरेकशक्ते
२५ र्वोपस्थापनेनावृत्तिस्वीकारविरोधात्। नन्वनेकवाक्यार्थबोधकत्वाभावनियमोभिप्रेतः घटा
वानयेत्यादौ घटद्वयाद्यानयनरूपवाक्यार्थस्यैकात्। घटंपटंचानयेत्यादौ घटानयनपटानयना
दिरूपवाक्यार्थस्य भेदादावृत्तिस्वीकार इति वाच्यं। घटार्थभेदेपि द्वितीयवाक्यार्थभेदस्यापरस्परक-
त्वात् घटावानयेत्यादौ वाक्यार्थैक्यस्यासंभवात्। नन्वेकपदानुसंधानजन्यबोधे तदर्थनिष्ठानेक
विषयताकत्वाभावनियमः घटावानयेत्यादि — वाक्यजन्यबोधे च घटद्वयत्वावच्छिन्नघटद्वया
दिविषयता तदानयनत्वावच्छिन्नानयनद्वयादिविषयताचाभिन्नैव घटंपटंचानयेत्यादिवा
क्यजन्यसमूहालंबनबोधे घटानयनत्वपटानयनत्वादिविभिन्नधर्मावच्छिन्नविषयताया अ
ध६ वच्छेदकभेदाद्भिन्नैव तद्भिन्नदोष इति वाच्यं॥ घटावानयेत्यादिवाक्यजन्यबोधे एकघटानयनविषयता कथ
या अपरघटानयनविषयताभेदे घटावानयेत्यादौ एककर्मत्वबाधितं तदानयननिष्ठविषयतायास्त
दानयनावृत्तित्व द्वटकर्मकत्वावच्छिन्नतद्घटानयननिष्ठविषयताभेदेन तद्बोधस्य तदवृत्तिधर्माव राम
च्छिन्ननिष्ठविषयताकत्वेन भ्रमत्वप्रसंगात् तत्र विषयताभेदस्यावश्यकतया तादृशनियमे २५
पि व्यभिचारादितिचेन्नैवं॥ एकपदानुसंधानजन्यबोधे एकविषयतानिरूपिततद्रूपविषयताद्
याभावनियमोपगमेऽनुपपत्त्यभावात्॥ घटावानय घटपटावानयेत्यादावानयनभेदेन तद्विषय

ताभेदेपि त॰ यविषयतानिरूपिता आनयनत्वप्रकारतारूपविषयता एकैवोपेयते वि
षयताभेदेपि एकत्वं घटंपटंचानयेति वाक्याज्जननसमूहालंबनबोधसंभवः। घटानयनपटानय
नमिति समूहालंबनबोधे तत्तदानयनविषयतानिरूपितानयनत्वविषयताया अभिन्नत्वात्स
मूहालंबने बोधस्य प्रत्येकज्ञानोत्पादकसामग्री समुदायाधीनतया प्रत्येकज्ञानीयविषयता
द्वयनियामकवशाद्विषयताद्वयसंभवात्॥ अत एव तत्रावृत्त्याक्रमेणानेकार्थबोधस्वीकारः। नन्वे
वमेकशेषानुशासनमफलं घटावित्यादौ हि त्वघटत्वाद्येकैकविशेषण एव येकैकविषयतानिरू
पित नानाघटादिविषयताशालिबोधस्यैकेनापि घटादिपदेनजननसंभवादितिचेन्न। तदनु
शासनवैफल्यस्येष्टत्वादिति। नव्यानां तु यमाशयः बोधस्यैकत्वाविरोधित्वेमानाभावः विरो
धित्वे वा तस्य न सर्वविकल्पमिति एतत्पदविषयकमनुसंधानमेतत्पदस्यार्थद्वयं बोधयतु
एतत्पदमर्थद्वयविषयकैकबोधजनयत्वित्याकारिका नानार्थादिशब्दविषयकैकानुसंधाने ने
कार्थ प्रत्यायकत्वप्रकारिकावक्तुरिच्छाकल्पितं संभवत्येव तद्बलान्नानार्थादिस्थले एकदानेका
र्थबोधो दुर्वारः नच तात्पर्ये सत्येपि सकृदुच्चरित इत्यादिनियमभंगभयान्नोक्तबोधाभ्युपगम संभ
वतीति वाच्यं। सामग्रीसत्वे नियमभंगस्याकिंचित्करत्वात्। किंच कस्यार्थकस्य पर्यंबोध-
कस्य वा पश्चादित्यत्र विनिगमकाभावेनावृत्त्याक्रमिकबोधोपगमासंभवेन युगपन्नानार्थबोधो

न्या० कौ०
२६

पगमएवोचित :। नचैवंतत्रवाक्यभेदव्यवहारानुपपत्तिः। वाक्यजन्यशाब्दबोधभेदस्यैववाक्यभेदप्रयोजक
त्वादिति वाच्यं। वाक्यार्थभेदस्यैववाक्यभेदप्रयोजकत्वात्। यत्त्वेवं सतिएतद्गृजलंघटंवस्त्रंपटंवअ्नेत्यादाव
पिवाक्यभेदोनस्यात्तत्र घटपदादिविशिष्टस्यैतद्गूतलादेर्वाक्यार्थस्यैक्यात्। किंचैवंसत्तिघटपटावानय
त्यादावपिवाक्यभेदापत्तिः घटमानयपटंचेत्यादाविवतत्रापिघटानयनपटानयनरूपवाक्यार्थ। भेदात्। नचै
वमापत्तिरितिवाच्यं। तथासतिएकवाक्यघटकयोरेवपदयोस्समासप्रयोजकसामर्थ्यस्वीकारेणतत्रघटप
टावितिघटपटपदयोस्समासानुपपत्तेरिति। तदसत्। अर्थनिष्ठस्वप्रयोज्यविषयतयोःसाक्षात्परंपरा
साधारणनिरूप्यनिरूपकभावविरहस्यैववाक्यार्थभेदत्वात्। घटपटावानयेत्यादिवाक्यजन्यबोधीयानय
नादिनिष्ठविषयतानामानयनत्वादिनिष्ठप्रकारतानिरूपितत्वेनपरंपरयानिरूप्यनिरूपकभावः॥
घटमानयपटंचेत्यादिवाक्यजन्यसमूहालंबनबोधीयानयनत्वादिप्रकारतायाविशेष्यताभेदेनभेदो
पगमात्तन्निरूपितनानानयनादिनिष्ठविषयतानांपरंपरयापि निरूप्यनिरूपकभावविरहइत्यदोषः।
तथाचनिरूप्यनिरूपकभावशून्यविषयताद्वयशालिबोधपरवाक्यमेकभेदः। अतादृशंवाक्यमेकत्व
मितिपर्यवसितं॥ नचैवंसकृदुच्चरितइतिनियमेमानाभावइतिवाच्यं। एतापत्तेरितिदिक्। अत्रस्च
स्यानस्थस्यपदस्यानुसंधानमावृत्तिः निकटस्थस्यैकदेशानुसंधानमनुषंगः दूरस्थस्यानुसंधा
नमनुवृत्तिः ... सिंहावलोकनमंडूकप्लुतिगंगाप्रवाहवदितित्रिधा। आवृत्त्यनुषंगानुवृत्तिसाधारणं राम
२६

... दत्वे ...
चप्रकृतप... स्वतंत्रप... रानुसंधानत्वं प्रकृतपदानुसंधानमध्याहार इतिध्येयं इत्यंचवक्तृअभिप्रायघटि
ततात्पर्यस्य ... बोधेप्रयोजकत्वे स्थितेवेदेवक्तृतया भावेनतात्पर्यनिर्वाहायातीन्द्रियवेदार्थदर्शीवेद
वक्तासर्वज्ञः परमेश्वरोपिसिद्ध्यतिजीवात्मनामसर्वज्ञत्वात्। योगिनांसर्वज्ञत्वेपियोगादिविध्युपदेशकवेद
मूलत्वाद्योगाभ्यासानुपपत्तेः सर्गादावयोगिनः सर्वज्ञस्यवेदवक्तुरवश्यंस्वीकरणीयत्वात्। अतएववेदस्यापौ
रुषेयत्वमपिनिरस्तमिवेत। अत्रमीमांसकाः वक्त्रभिप्रायघटिततात्पर्यस्यशाब्दबोधप्रयोजकत्वेपिनतद्नु
रोधेनेश्वरसिद्धिः अध्यापकृतात्पर्येणैवतन्निर्वाहात्। अध्यापकानामसर्वज्ञत्वेपिपूर्वपूर्वाध्यायकोद्धृता
त्ताऽवत्तात्पर्यसहकृताद्वेदादेवतदर्थज्ञानं। नन्वमध्येप्रलयेनाध्यापकपरंपराया विच्छेदात्सर्गादौतत्तात्प
र्यासंभवेनेश्वरस्वीकारआवश्यकइतिवाच्यं॥ प्रलयमानाभावेनाध्यापकपरंपरायाअविच्छेदात्। तस्मा
भवेदस्यपौरुषेयत्वमितिवेदस्यापौरुषेयत्वमेवेतिवदंतितदसत्। कालकपाद्याव्यावृत्तिर्घटप्रागभावः
कार्यद्रव्यानाधाराधारः अभावत्वादाकाशवदित्यनुमानेनातीतप्रलयसिद्धेः एवमेवघटध्वंसीयत्
कृत्यभावि प्रलयोपिसाधनीयः एवमेककालीनास्सर्वेपरमाणवः कार्यद्रव्यशून्याआरंभकत्वात्। नष्ट
पवनारंभकपरमाणुवत्। ब्रह्मांडसंततिरत्यंतमुच्छिद्यतेसंततित्वात्॥ प्रदीपसंततिवदित्याद्यनुमा
नादपितत्सिद्धिः सदेवसौम्येदमग्रआसीत्। धातायथापूर्वमकल्पयदित्याद्याःश्रुतयः सर्वभूतानिकौ
न्तेयप्रकृतिंयांतिमामिकांकल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहमित्याद्याःस्मृतयोपिप्रलयेमानं
प्रकृतिर्मूलकारणत्वात्परमाणुरेतोस्माकंसांख्यानामिवातिरिक्तप्रकृत्यनंगीकारेपिनक्षतिः एवंवेद

न्या.कौ. २७

स्यापौरुषेयत्वे तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायंत ऋचः सामानि जज्ञिरे इत्यादिश्रुतिविरोध
प्रसंगश्चेति तद्विवर्त्तनपरेति वाच्यं मुख्ये बाधकाभावात् । तस्माद्वेदः पौरुषेय एवेति नन्वस्तु किमिदं वेदत्वं
पौरुषेयत्वं चेति चेदुच्यते । मंत्रब्राह्मणान्यतरत्वं वेदत्वं अत एव मंत्रब्राह्मणयोर्वेदनामधेयमिति
प्राचीनगाथापि मंत्रो द्विविधो ऋक् यजुश्च तत्र नियतवर्णपदात्मकः ऋक् अनियतवर्णपदं यजुः यत्र ऋ
चां बाहुल्यं स ऋग्वेदः यत्र च यजुषां बाहुल्यं स यजुर्वेदः ऋग्यजुषोर्विधेयगानप्राधान्येन साम
वेदः गानोपयोगितया यथायुक्ता वेदबाह्याः स्तोमाः तेन निरर्थका अपि गीयमानाः पुण्याय एवं ऋग्यजु
षोर्विवक्षया शांतिकपौष्टिकपुरस्कारेण प्रवृत्तोऽथर्ववेदः निगदो यजुर्विशेषः खिलमकृतपदं ऋक्
यजुर्वर्णितेर्मंत्रप्रपंचाः ब्राह्मणं तु विधिरर्थवादश्चानुवादश्च तत्र विधिश्चोदना अर्थवादः स्तुतिनिंदाप
रकृतिः पुराकल्पश्च अनुवादः सप्रयोजनं पुनर्वचनं एते ब्राह्मणप्रपंचाः मंत्रब्राह्मणैकदेशत्वप्रत्येकमा
दौ कर्मकांडशेषे ब्रह्मकांडं कर्मकांडस्य प्रवृत्तिलक्षणे धर्मे तात्पर्यं ब्रह्मकांडस्य तु निवृत्तिलक्षणे ता
दृशाश्च सर्वा एव शाखा इति सहस्रशाखस्यापि वेदस्यापौरुषेयतासंयुं पौरुषेयत्वं च स्वतंत्रपुरुषप्रणी
तत्वं तच्च स्वसमानानुपूर्वीकवाक्यज्ञानाजन्यस्वप्रतिपाद्यवाक्यार्थज्ञानवज्जन्यजातीयत्वं वेदभारता
दिप्रणीतत्व[illegible]व्यवहारनिर्वाहाय जातिघटनमिति । मणिकारास्तु पाणिनीनाप्तोक्तः शब्दः शब्दोपजी
विप्रमाण[illegible]प्रमाणजन्यप्रमितिविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणश राम २७

वत्वं वेदत्वं अत्र शब्[illegible] द्युती विषयत्वप्रमाणं तदुभयभिन्नप्रमाणजन्यप्रमितिविषयार्थकं यत्तदन्यत्वे
सतीति सत्यंतार्थः । अस्ति चेदं लक्षणं स्वर्गकामो यजेतेत्यादिवेदेतदर्थस्य स्वर्गादिसाधनत्वविशिष्टयाग
दिरूपस्यालौकिकत्वात् सिद्धत्वेन शब्दशब्दोपजीविप्रमाणातिरिक्तेन प्रत्यक्षप्रमाणादिनाऽग्रहात्र नि
क्तेप्रमाणाविषयार्थकत्वं किंतु ॥ घटोऽस्तीत्यादिलौकिकवाक्यस्यैव तदन्यत्वस्य एवं वेदात्मकशब्दजन्यपदार्थवा
र्थज्ञानं वेदार्थशाब्दबोधरूपं तज्जन्यं यत्स्मृतिपुराणादितदन्यप्रमाणशब्दत्वस्य च तत्र सत्वेन लक्षणासम
न्वयसंभवात् अत्र घटोऽस्तीत्यादिलौकिकवाक्यस्य वदस्यार्थकं स्मृतिपुराणादिवाक्येऽपि प्रसंगवारणाय सं
स्यंत निवेशः शब्दोपजीविप्रमाणातिरिक्तेन वेदात्मकशब्दप्रमाणेन शब्दभिन्नेन च यागः स्वर्गसाधनं स्व
र्गसाधनतावच्छेदकरूपकत्वादित्यनुमानादिना साध्यादिप्रसिद्धिसंपादकशब्दोपजीविप्रमाणेन वेदार्थ
स्यग्रहणादसंभव इति शब्दप्रमाणान्यदस्य शब्दोपजीविप्रमाणभेदस्य च सत्वं तार्थभेदप्रवृत्तियोगिकोटिप्र
विष्टजन्यत्वप्रतियोगिप्रमाणविशेषणं तया निवेशः न च परज्ञानस्य शाब्दकरणतामते शब्दातिरिक्तत्व
स्य प्रमाणविशेषणत्वेऽप्यसंभव तादवस्थ्यमिति वाच्यं ॥ तन्मते शब्दपदस्य शाब्दज्ञानपरतयाऽदोषात्
अत्र शब्दोपजीविप्रमाणत्वं शब्दप्रमाणाप्रयोज्यप्रमितिकरणत्वं न तु शब्दप्रमाणाप्रयोज्यत्वे सति प्रमि
तिकरणत्वं तथा सति च दूराद्दीपदर्शनादिजन्यानुमानादीपदर्शनादि कर्तृत्वमता बोधकशब्दप्रयोज्य
तयातिरिक्तांते नाव्याप्तेर्नानित्यस्य श्रवणादेरेव व्यावृत्तिर्नागृहीतार्थके घटोऽस्तीत्यादिलौकिक
वाक्येति प्रसंगात् । अपवक्तृरादेरदृष्टद्वारा शब्दोपजीवित्वेऽपि वा दृष्टा दिज्ञानस्यापि शाब्दप्रयोज्यतावश्य

न्या.कौ. कतया जन्यमात्रस्यादृष्टाधीनतया प्रावण प्रत्यक्षस्यापि तत्वेन तद्द्वारकशब्दाधीनादृष्टोपजीवितया प्रमा
२९ णमात्रमेव शब्दप्रयोज्यप्रमितिकरणमिति तदन्यप्रमाणाप्रसिद्धिरित्यदृष्टद्वारकत्वविशेषणस्योपजी
वितायामवश्यं प्रवेशनीयतया प्रमितिकरणे पि शब्दोपजीवित्वविशेषणं संभवतीति चेन्न। शब्दसहकृ
तेन येन प्रमितिर्जन्यते तत्वस्य शब्दोपजीविप्रमाणपदेन विवक्षणीयतया दृष्टद्वारकत्वविशेषणं विनै
वास्माकं निर्वाहात्। न हि चक्षुरादिना प्रत्यक्षादिजनने शब्दस्य सहकारितां चक्षुरादिसत्वे तज्जनकादृष्ट
जनकशब्दस्यावश्यकतया चक्षुरादेः प्रमित्यनुपधायकतया शब्दव्यतिरेकाप्रयोज्यत्वात्। वस्तु
तस्तु स्वतः। शब्दोपजीविभिन्नत्वप्रवेशे शब्दजन्यस्वर्गानुपस्थितिसहकृतचक्षुरादिप्रमाणजन्यवेदार्थगो
चरोपनीतभानमादाय संभवः। प्रमितौ गुरुनैयायिको मयूसिद्धत्व विशेषणोपादाने नोपनीतभानात्मक
प्रमितिवारणे पि ज्ञायमानलिंगस्यानुमितिकरणतापक्षे यागादौ स्वर्गसाधनत्वाद्यनुमापकलिंगस्य
स्वतः शब्दानुपजीवकत्वेन ज्ञानकरणतामतेपि व्याप्तिघटकपदार्थानां विशकलितानामुपस्थित्या
विशेष्ये विशेषणमित्यादिरीत्या परामर्शोघटनानुमितिस्तदनुरोधेन व्याप्तिघटकाभावादिज्ञानस्य का
रणताया उपगंतव्यतया तस्य च साध्याविषयकस्य स्वतः शब्दानुपजीवकत्वेन तज्जन्यवेदार्थगोच
रानुमितिमादाय संभवो दुर्वारः। प्रमारूपफलद्वारा शब्दोपजीवितालाभार्थकत्वे च प्रथमप्रमाणप राम
पदसार्थकता। शब्दप्रमाणफले शब्दस्योपजीव्यत्वेपि स्वस्य स्वासहकारित्वात् शब्दप्रमाणे शब्दस्य २९
सहकारित्वेतिश[illegible]निरुक्तशब्दोपजीवित्वमिति न प्रथमशब्दवैयर्थ्यं। ननु चक्षुरादिना

घटास्तित्वादिरूपलौकिक[illegible]यथार्थज्ञानजननेपि कुत्रचिद्विशेषणज्ञानद्वारा विशेषणबोधकशब्दस्य सहका
रितया चक्षुरादेरपि विशेषणः फलद्वारा शब्दोपजीवित्वमस्त्येवेति तादृशचक्षुरादिमात्रगृहीतार्थकलौकिकवा
क्येति व्याप्तिर्दुर्वारा। नन्वयज्जन्यप्रमितिसामान्यं शब्दप्रयोज्यं तत्वस्य शब्दोपजीवित्वमनेन विवक्षणान्नोक्तातिव्या
प्तिरिति वाच्यं। तथा सति मनःशरीरादिजन्यप्रमितिसामान्यस्य शब्दप्रयोज्यत्वाभावेन मनःशरीरादीनां श
ब्दानुपजीविप्रमाणतया तज्जन्यशाब्दप्रमितिविषयार्थकत्वाद्यदस्येत्यसंभवापत्तेः। अथ च द्वितीयप्रमाण
पदेनासाधारणप्रमाणस्य विवक्षणान्नायं दोषः। चक्षुरादौ निरुक्तशब्दोपजीवित्वाविरहेपि तज्जन्यवेदा
र्थोपनीतभानमादाय नासंभवः। असाधारणप्रमाणप्रयोज्यविषयतया अर्थविशेषणत्वोपगमात्। ज्ञान
लक्षणायां मनसः प्रत्यासत्तित्वोपनीतवेदार्थनिष्ठचाक्षुषादिविषयताया अपि असाधारणप्रमाण
जन्यत्वचक्षुराद्यप्रयोज्यत्वात्। सामान्यलक्षणाया बहिरिन्द्रियप्रत्यासत्तित्वे स्वजन्यज्ञानसमानविषयकत्वे
न प्रमितेर्विशेषणीयतया न सामान्यलक्षणाजन्यवेदार्थगोचरचाक्षुषादिप्रमामादायासंभवः। अत एव
यागादिरूपवेदार्थैकदेशस्य लौकिकप्रमाणागम्यत्वेपि न दोषः। स्वर्गत्वाद्यप्रकारकस्य लौकिकप्रमाणज
न्यया गत्वादिप्रकारकबोधस्य स्वर्गसाधनं याग इत्यादिवेदजन्यबोधीयविषयतावत्त्वरूपतत्समानविषय
कत्वाभावात् याग इत्यादिज्ञानीययागादिनिष्ठविषयतायाः स्वर्गसाधनं याग इत्यादिज्ञानीयविषयतालौ
न्यत्वात्। ननु प्रमितिविषयार्थकत्वमित्यस्य प्रमितिविषयान्यार्थकत्वमित्येवार्थः। तथा चालौकिकस्व
र्गादिरूपार्थबोधकतया वेदे लक्षणगमनसंभव इति वाच्यं। स्वर्गादेरपि स्वर्गत्वादिनानुमानादिना

न्या·कौ· परलौकिकप्रमाणगम्यत्वादिति चेन्न। स्वर्गसाधनत्वाद्यनुमापकयागविशेषत्वादिरूपलिंगात्मकानुमान
जन्यगुणत्वाद्यनुमितेस्तत्करणकप्रमितिसामान्यांतर्गततया। शब्दोपजीवितविरहेण तादृशानुमानस्या
२९ प्रार्थकतायां वेदस्य त्वात्संभवस्य दुर्वारत्वादिति चेन्नैवं॥ शब्दसहकारेणैव येन स्वजन्यज्ञानसमानविष
यकप्रमितिजन्यते तदन्यप्रमाणगम्यार्थकत्वं तदन्यत्वनिवेशेनोक्तदोषाभावात् गुणत्वाद्यनुमितेर्वेद
जन्यज्ञानसमानविषयकत्वाभावात् तत्समानविषयकानुमित्यादेरुक्तानुमानादिजनने शब्दस्य सह
कारितानियमादेदस्यापि उक्तानुमानादेः शब्दोपजीवित्वात्तु ततः। अत एव चक्षुरादिजन्य वेदार्थगोचरोपनी
तभानमादायापि नासंभवप्रसक्तिः चक्षुरादेरयुक्तरीत्या वेदस्य स्वः पदेनोपादाने शब्दोपजीवित्वात्तते।
न च यादृशचक्षुरादिव्यक्तौ शब्दजन्यविशेषणज्ञानसहकारेणैव यादृशवाक्यार्थज्ञानं जनितं तादृशचक्षु
रादिमात्रगृहीतार्थकतादृशवाक्यार्थकवाक्ये अतिव्याप्तिर्दुर्वारैवेति वाच्यं॥ तादृशवाक्यजनकचक्षुर्वाक्या
र्थज्ञानस्यापि शब्दप्रयोज्यत्वेन तस्य शब्दजन्यवाक्यार्थज्ञानाजन्यत्वदलाभावेनैवोक्तातिव्याप्त्यभावात्
शब्दजन्यपदस्य शब्दप्रयोज्यार्थकतया प्रत्यक्षरूपचक्षुर्वाक्यार्थज्ञानस्य शब्दजन्यत्वेपि शब्दाधीन
विशेषणज्ञानजन्यत्वेन शब्दप्रयोज्यत्वात्। चैत्रः शब्दायतरस्यादो शब्दघटितवाक्यार्थबोधकवा
क्यवाक्यार्थस्य तज्जन्येप्येतद्दलाभावादेव नातिव्याप्तिः नत्तु सत्यं तत्त्वाभावात् शब्दरूपविशेषणज्ञानं राम
विना तादृशवाक्यार्थज्ञानासंभवेन प्रमाणमात्रेण तादृशवाक्यार्थप्रमितिजनने शब्दस्य सहकारित ·२९
या तादृशवाक्यार्थ[illegible]जीविप्रमाणमात्रग्राह्यत्वेन तद्दलसत्वात् यत्तु शब्दजन्यवाक्यार्थज्ञाने

पजीवित्वस्य शब्दे तो[illegible]तेन विवक्षणात् तादृशवाक्ये नातिव्याप्तिः नन्वचैत्रवाक्यादयमर्थो ज्ञातव्य इत्या
दिशब्दजन्यवाक्यार्थज्ञानघटितार्थकवाक्ये तिव्याप्तिरिति वाच्यं॥ चैत्रवाक्यजन्यार्थबोधं विनापि अन्यत्र चै
त्रवाक्यजन्यत्वरूपसामान्यज्ञानान्नेन रूपेण चैत्रवाक्यजन्यबोधभ्रमेण तादृशवाक्यार्थज्ञानोत्पादनेन तद्घट
नादिति विशिष्टैरुक्तत्वान्न चारु। शब्दजन्यवाक्यार्थज्ञानपर्यंतोपजीवितानिवेशे वेदवाक्यार्थज्ञानं विनैव श
ब्दजन्यतादृशवाक्यार्थघटकविशकलितस्वर्गादिपदार्थोपस्थितितो वेदार्थगोचरानुमानसंभवेनासंभ
वापत्तेः। शब्दजन्यवाक्यार्थज्ञाने तस्य शब्दवृत्तिज्ञानजन्यज्ञानार्थकत्वेनासंभववारणेपि शब्दत्वजाति
विशिष्टघटितार्थकवाक्ये तिव्याप्तेर्दुर्वारत्वात् तादृशवाक्यार्थज्ञाने शब्दत्वजातिग्रहस्यापेक्षणीयतया
तादृशजातिमतः शब्दवृत्तिज्ञानजन्यशाब्दबोधस्यैव ज्ञानापेक्षानियमात्। व्यक्तिं विना मूलभूतप्रत्यक्ष
ज्ञानेन जातेरग्रहणाच्च। यदपि स्वजन्यज्ञानसमानविषयकज्ञानजनकशब्दज्ञानजन्यज्ञानोपजीवित
याविवक्षणान्नोक्तदोषावकाशः शाब्दत्वजातिविशिष्टघटितस्य शब्दत्वप्रमर्परत्यादिवाक्यार्थस्य तादृशवा
क्यजन्यज्ञानविषयकज्ञानसमानविषयकज्ञानजनकघटोस्तीत्यादिवाक्यजन्यशाब्दज्ञानमात्रे शाब्दत्वाग्र
हीत्वापि ग्रहसंभवात् तादृशवाक्यार्थग्राहकप्रमाणस्य समानविषयकज्ञानजनकशब्दानुपजीवित्वा
त्समानविषयकत्वं तद्विषयविषयकत्वमेव न तु तद्वृत्तिविषयताकत्वं अतः स्वर्गकामो यजेतेत्यादिवा
क्यजन्यबोधे यादृशी विषयता तद्भिन्नविषयताशालिबोधजनकं किंचिदाकोप[illegible]पि तत्स्वर्गा
दिसाधनत्वबोधकानुमानग्राह्यत्वेपि तादृशवेदस्य न संभवहानि॥ तदपि न सम्यक् शाब्दत्वविशिष्टघ

 रितया तादृश॰ वाक्यार्थघटकयत्किंचित्पदार्थघटितार्थवाक्यार्थविषयकशाब्दबोधे प्राप्तत्वं गृहीत्वेव
तादृशवाक्यार्थत्वानंतत्वात्तिप्रसिद्धेर्दुर्वारत्वात्। अत्र शब्दप्रयोज्यप्रमितिकरणभिन्नकरणकत्वेन शब्द
 प्रयोज्यप्रमितेरुपादानं शिरोवेष्टनेन नासिकास्पर्शवदनुचितमिति शब्दप्रयोज्यत्वेनैव तादृशी प्रमिति
र्विशेषणीया प्रयोज्यत्वं जन्यव्यावृत्तमिति शाब्दबोधान्यत्वमपि विशेषणमुपादेयं अन्यथा वेदजन्यभ्रमप्र
मितिमादायासंभवापत्तेः अत एव परपक्षे शब्दपदोपादानाविरोधः जन्यसाधारण्यप्रयोज्यत्वनिवेशे तु शा
ब्दबोधान्यत्वं न पृथक् निवेश्यं प्रयोज्यत्वं साधारणमेवाभिप्रेतं एतत्सूचनायैव पृथक् शब्दपदोपादान
मिति वा। नन्वशब्दप्रयोज्यत्वेन प्रमितेरुपादाने ईश्वरप्रमितेरप्यजन्यतया तथात्वेनैव दृष्टार्थस्यापि वि
षयतया संभवः। जन्यत्वेन प्रमितेर्विशेषणे तु परमते जन्यत्वस्याव्यावर्तकतया तद्घटितधर्मस्य गुरु
तयाभावप्रतियोगितानवच्छेदकत्वेन तद्वच्छिन्नप्रतियोगिताकत्वलक्षणघटकभेदाप्रसिद्धिरिति वा
च्यं।। ध्वंसाप्रयोज्यत्वस्य शब्दाभावाप्रयुक्तप्रागभावप्रतियोगित्वरूपस्य निवेशनीयतया तस्य
प्रागभावाप्रतियोगीश्वरज्ञानव्यावर्तकत्वात् यद्वा अयमतसिद्धत्वं प्रमितिविशेषणं तच्च नैयायिक
सिद्धत्वव्यभिचारेतरप्रमितेर्व्यावर्तकमिति तत्तद्घटितभेदप्रतियोगितावच्छेदकस्य न धर्मान्तरसम
नैयत्यं। एवं च वेदार्थगोचरयोगजधर्मजन्यप्रमितेस्तन्मूलोपनीतभानस्य च व्यावृत्तिः नच योगज
धर्माधीनप्रमितेर्योगिविध्युपदेशाकशब्दप्रयोज्यतयो नयमतसिद्धत्वविशेषणमंतरेणापि व्याव
र्त्तिः संभवतीति वाच्यं जन्यमात्रस्यैवादृष्टजन्यतया दृष्टेच प्रवर्तकविधिवाक्यापेक्षयाजन्यप्र

मितिमात्रस्यैव शाब्दप्रयोज्यत्वमित्यदृष्टद्वारकोपजीवकतया एव निर्देशनीयतया योगाधीनप्रमि
तेरुक्तविशेषणं विना व्यावृत्त्यसंभवात्। एवं स्वर्गादिपदार्थघटकदुःखासंभिन्नसुखवादीनां विशिष्टं स्वल वि
षयतां शाब्दज्ञानमूलकशाब्दमानसविशिष्टविषयकोपनीतभानं तादृशसाध्यप्रसिद्ध्यादिमूलकानु
मितिश्चोभयवादिसिद्धत्वविशेषणेनैव व्यावर्त्तते प्रमेयत्वादिसामान्यलक्षणजन्यवेदार्थगोचरप्रमिते
रुभयसिद्धत्वविशेषणेन वारणेऽपि स्वजन्यज्ञानसमानाकारकत्वं प्रमितिविशेषणमुपादेयं अन्यथा या
गादेर्विपाककालेदुःखासंभिन्नसुखादिसुखशब्दानुपजीविप्रमितिविषयतया संभवापत्तेः स्वजन्यज्ञान
समानाकारकत्वं च स्वजन्यज्ञानीयविषयितावत्त्वमेव एतस्य प्रमितिविशेषणत्वेन च स्वजन्यज्ञानसमा
नाकारशब्दानुपजीविप्रमितिकत्वमेव भेदप्रतियोगितावच्छेदकतया निवेश्यं न तु तादृशप्रमितिवि
षयबोधकत्वरूपतादृशप्रमितिविषयार्थकत्वपर्यंतं प्रयोजनाभावात्।। वस्तुतस्तु स्वजन्यज्ञानसमा
नाकारकत्वेन प्रमितेर्न विशेष्यापि तु। तादृशप्रमितिविषयार्थकत्वं तादृशप्रमितिविषयबोध
कत्वं तदेव तादृशप्रमितिनिरूपितविषयताशालिबोधजनकत्वरूपं निवेश्यं लौकिकार्थगोचर
प्रमितेर्यच्छब्दजन्यज्ञानीयविषयतावत्त्वं तादृशज्ञानसमानाकारत्वं तच्छब्दस्यैव च तादृ
शप्रमितिनिरूपितविषयताशालिबोधजनकत्वमिति वेदस्यात्यन्ताव्यात्वेन सामंजस्यात्। विशिष्ट
विषयकशाब्दादिज्ञाने विशकलितत्तत्पदार्थविषयतायाः अप्रामाणिकत्वात् लौकिकप्रमाणज

स्मृतानीयस्य खदुःखासंभेदादि निरूपितविशिष्टं खलविषयतायां वेदजन्यज्ञाने ऽभावात् अन्यथा शब्दानु
रूपज्ञी विप्रमितिशब्दजन्यज्ञानयोः समानाकारकत्वस्य वैपरीत्येन निवेशपत्तेप्यनिस्तारात्॥ नच स्वर्गका
मो यजेतेत्यादिवेदवाक्येनापि तात्पर्यभ्रमेण स्वर्गादि यदजनकत्वोपस्थितौदनादिघटितौदनकामकार्यत्व वि
शिष्टयागादिरूपलौकिकप्रमाणाप्राप्तार्थत्वाद्वेदविधावत्पज्ञीविप्रमितिविषयार्थकान्यत्वं दुर्धरमि
ति वाच्यं॥ तादृशप्रमितिसमानाकारप्रतीतिपरत्वस्यैव निवेशनीयतया तात्पर्यप्रमाधीनबोधमादा
यानुपपत्तिविरहात् तादृशप्रमितिसमानाकारप्रतीतिपरत्वंच। तादृशप्रमितिर्या विषयतातद्विशि
ष्टप्रतीतिविषयकेच्छयोच्चरितत्वं तेन लौकिकवाक्यार्थविषयकसमूहालंबनवेदार्थबोधस्यैवेच्छा
स्यार्थविषयत्वेपि न दोषः॥ नन्वेवं निरस्तात्पर्यकत्वे लौकिकवाक्ये तिव्याप्तिः प्रमाणशब्दत्वरूपविशेष्यद
लस्य सत्तात्पर्यकशब्दत्वरूपतया तद्विरहेणातिव्याप्तिविरहात् नचैवं निस्तात्पर्यके स्वर्गोच्चरितवेदे
नैयायिकनये ऽव्याप्तिः तादृशशब्दजातीयत्वस्य तत्समानानुपूर्वीकत्वरूपस्य विवक्षणेन तत्संग्रह
स्यौक्त्यभावात्। नन्वेवमलौकिकवेदार्थमात्रपरत्वाल्लौकिकघटितमोदनकामः पचेतेत्यादिवाक्यमा
त्रस्य तादृशवाक्यसामान्ये ऽतिव्याप्तिरिति वाच्यं॥ तस्य शब्दजन्यवाक्यार्थज्ञानजन्यतया वेदसमाना
र्थकस्मृतिवद्वारणात्। वेदसमानार्थकवेदविपरीतानुपूर्वीकशुकादिवाक्यवारणाय निवेशनीये पद॰ राम ३१
तादृशजनकाधीन [illegible] र्थत्व विशेषणेनापि तद्वारणसंभवात्। नचैवं तादृशविशेषणेनैव वदव्याप्तिर्य
ले

ले काध द
कास्मदादिवाक्य [illegible] वेनसत्त्वं तदसंग्रथमिति वाच्यं। दृष्टार्थकभारतपुराणान्तर्गतदृष्टार्थकवाक्यवा
रकतयातस्य सार्थकत्वात्। भारताद्यध्ययनस्य विधिबोधितत्वेनादृष्टजनकतयोक्तविशेषणस्य तत्साधारण्ये
न तेन तद्वारणासंभवात्। अथ दृष्टार्थके आयुर्वेदे ऽव्याप्तिस्तत्र तत्पतविरहादिति चेन्न। तस्य मीमांसकैर्वेदत्वा
नभ्युपगमे नोभयमतसिद्धवेदस्यैव लक्ष्यतया तत्राव्याप्त्यनवकाशात् एवं दृष्टार्थकमंत्राणामपि लक्ष्यता
नंगीकाराभ्युपगमे तत्राप्यव्याप्तिराशंकावेदसमानार्थकस्मृतिभारतादिवाक्ये तिव्याप्तिश्च शब्दजन्येत्यादि वि
शेष्यदलेन वारणीया। तत्र शब्दजन्यत्वं शब्दप्रयोज्यत्वं तेन वेदप्रयोज्यस्मृत्यादिरूपवाक्यार्थज्ञानजन्यस्मृ
त्यादेर्नातिव्याप्तिः अन्यथा पूर्वोक्तदोषस्यापि वारणासंभवाच्च। यद्यपि न्यायमते जन्यवाक्यार्थज्ञानाजन्य
त्वनिवेशेनैव सामंजस्यं अस्मदाद्युच्चरितवेदस्यास्मदादिवाक्यार्थज्ञानजन्यत्वेपि जन्यज्ञानाजन्येश्वरोच्चरि
तवेदजातीयत्वमादायलक्षणसमन्वयात् शब्दादेरर्थप्रतीत्याप्यस्मदादेर्वेदोच्चारणसंभवात् तत्संग्रहाय
वाक्यार्थज्ञाने शब्दजन्यत्वनिवेशेपि तादृशवाक्यार्थज्ञानाजन्यजातीयत्वनिवेशस्यावश्यकत्वात् एतया
पि मीमांसकमते ज्ञाने जन्यत्वस्याभावर्त्तकतया जन्यवाक्यार्थज्ञानजन्यत्वस्याभावप्रतियोगिताव नवच्छे
दकत्वेन तदवच्छिन्नभेदरूपस्य तादृशवाक्यार्थज्ञानाजन्यत्वस्याप्रसिद्धिरिति ज्ञाने शब्दजन्यत्वं वि
शेषणं। ननु शब्दजन्यत्वं यदि शब्दप्रयोज्यत्वं तदाजन्यत्ववत्तदपि परमते ज्ञाने। आवर्त्तकं अदृष्ट
जनकप्रवृत्तिजनकविधिवाक्यस्य ज्ञानमात्रे एव प्रयोजकत्वादिति वाच्यं। अदृष्टद्वारकशब्दप्रयो
ज्यत्वस्यैव निवेशनीयत्वात्। शब्दाप्रयोज्यत्वस्य शब्दप्रयोज्यज्ञानमात्राजन्यत्वस्य वा विशेषणत्वेस्व

न्या॰ कौ॰ ध्वंसरूपकालोपाधिद्वारा ईश्वरेच्छा इति वेदेऽपि शब्दांतरस्य प्रयोजकत्वात् तत्कालीनपुरुषांतरीयशब्दप्र-
योज्यज्ञानस्य कालोपाधिविधया जनकत्वात्तत्रासंभव इति वाक्यार्थज्ञानोपादानं ॥ तादृशज्ञानाजन्यत्वे
३२ च यथाश्रुतं यद्यपि व्यावर्त्तकस्य तथापि व्यावर्त्तकं परमते । तेषां वर्णानां स्वेव नित्यतया वाक्यार्थज्ञानाज-
न्यत्वात् तथापि तादृशज्ञानाजन्यत्वं तादृशज्ञानाजन्योच्चारणकत्वं परमते पि वाक्योच्चारणस्य कंठाद्यभिघा-
तरूपस्य वाक्यार्थज्ञानजन्यतया स्मृत्यादिव्यावर्त्तकत्वविशेषणेन संभवात् न च तादृशोच्चारणकत्वं ता-
दृशोच्चारणजन्यत्वं तादृशोच्चारणप्रयोज्यत्वं वा प्रथमे परमते वेदेऽसिद्धिः द्वितीये न्यायमते स दोष । तन्मते
उच्चारणस्य शब्दजनकस्य शब्दप्रयोजकत्वादिति वाच्यं । न्यायमतेप्युच्चारणस्य व्यक्तिविशेषसंपादनेन बी-
जकतया तत्प्रयोज्यतया एव विवक्षितत्वात् । अथवा तादृशज्ञानाजन्यत्वं तादृशज्ञानाप्रयोज्यानुपूर्वी-
कत्वं प्रयोज्यत्वं जन्यजन्यतावच्छेदकसाधारणं स्मृत्याद्यानुपूर्व्या न्यायमते तादृशवाक्यार्थज्ञानजन्यता-
वच्छेदकतया परमते च तज्जन्यतया तत्प्रयोज्यत्वमव्याहतमिति न स्मृत्यादावतिप्रसंगः न चानुपूर्व्या अति-
रिक्तपदार्थरूपाया न्यायमतेऽप्रसिद्धेः एकवर्णनिष्ठापरवर्णध्वंसकालीनत्वात्मकक्रमरूपायाः परम-
तेऽप्रसिद्धेर्विशिष्य निवेशासंभव इति वाच्यं ॥ उभयानुगमकप्रसिद्धरूपस्यापि एकनिष्ठापरध्वंसका- राम
लीनत्वानात्मकत्वशब्दवृत्तित्वोभयाभाववत्त्वादिरूपस्य कथंचिन्निर्वचनसंभवेन तेन रूपेणैव विशिष्या- ३२
नुपूर्वीनिवेशात् । यद्वा । तादृशवाक्यार्थज्ञानजन्यतायां नैयायिकसिद्धभिन्नत्वविवक्षणान्न दोष इति तज्ज-
न्यज्ञानजन्य[illegible]यिकमतसिद्धभिन्नत्वनिवेशनेऽपि वा नातिप्रसंगो विशेषणांतरवैयर्थ्यात् । न

पोरेकचर
च विशेषणेन [illegible]जन्यत्वस्य ज्ञाने व्यावर्त्तकत्वप्रसंग इति विशेषणांतरोपादानमावश्यकमि-
ति वाच्यं ॥ ज्ञानेजन्यत्वस्याव्यावर्त्तकत्वेपि नैयायिकसिद्धो ज्ञानजन्यत्वप्रकारिकायामपि जन्यज्ञानज-
न्यत्वत्वावच्छिन्नप्रकारकत्वासत्त्वेन तदवच्छिन्नप्रकारकनैयायिकसिद्धिविषयत्वस्य लघुतदेकदेशस-
मनियतत्वासंभवेन तदवच्छिन्नप्रतियोगिताकभेदप्रसिद्धिसंभवात् । अथोक्तविशेषणेन वाक्यार्थज्ञाना-
धीनेयत्पुच्चारणं तादृशस्मृत्यादिवारणेपि वाक्यार्थमज्ञात्वा शुकगान्धारन्यायेन केनचिदुच्चारिते स्मृत्यादाव-
तिव्याप्तिः तादृशवाक्यार्थज्ञानजन्याद्यत्स्यानुपूर्वीमत्त्वनिवेशने संभवः वेदवाक्यानि स्वानुपूर्वीविशेषा-
वच्छिन्नानां केषांचिद्वाक्यानां शब्दजन्यवाक्यार्थज्ञानजन्यत्वेन तदानुपूर्वी एव तादृशवाक्यार्थज्ञानजन्या-
वच्छिन्नत्वानुपपत्तेरिति चेन्न ॥ यादृशानुपूर्वीमद्वाद्यादिव्यक्तेर्वाक्यार्थज्ञानजन्यता तादृशान्यानुपूर्वीमत्त्वविव-
क्षया सामंजस्यात् मीमांसकमते वेदानुपूर्वीमद्वादिव्यक्तेरभावात् न्यायमते चादिवेदव्यक्तीनां जन्यज्ञा-
नाजन्यतया स्मृत्याद्यानुपूर्वीणामेव तादृशपदेनोपादानसंभवात् । वाक्यार्थज्ञानजन्यत्वं च तज्जन्यो-
च्चारणकत्वादिरूपं बोध्यमिति दिक् पौरुषेयत्वं च सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं अत्र
निष्कर्षेण विवक्षितः तज्जातीयत्वं च न भेदगर्भं विवक्षितं तथा च सजातीयोच्चारणानपेक्षोच्चारणजन्य-
व्यक्तिजातिमत्त्वं पर्यवसितं । यथाश्रुते तदानीतनास्मदादिवेदोच्चारणस्य सजातीयोच्चारणापेक्षत्वे
[illegible] न तादृशोच्चारणानपेक्षोच्चारणमाद्यवेदोच्चारणमेव तज्जन्यजातीयत्वस्याद्यवेदे संभवेनाव्याप्त्या

पत्तेरित्ति दिगित्ति प्राहुः। यांचस्तु पौरुषेयत्वानुमाने वेदत्वावच्छिन्नस्य न पक्षत्वं वेदत्वस्याननुगतस्य
दुर्वचत्वात् किंतु स्वर्गकामो यजेतेत्यादिरूपविशेषस्यैव पक्षत्वं तावतैवेश्वरसिद्धेः नचैवं सर्ववेदकर्तृत्व
मीश्वरे न सिध्यतीति वाच्यं॥ तल्लघुविसकर्तृकत्वानुमाने एकत्रलघुत्वस्यैव कर्तुर्लाघवेनापरत्रापि कर्तृ
त्वकल्पनया सर्वासु श्रुतिषु एककर्तृकत्वसिद्धो ईश्वरे सकलवेदकर्तृत्वसिद्धेः। नचाणकस्यात्र च पक्षत्वेऽत्र
गंतरेषु हेतोः संदिग्धव्यभिचारकत्वापत्तिरितिवाच्यं। क्षितित्वपक्षकेश्वरसाधकसकर्तृकत्वानुमाने घ
कुशादिषु संदिग्धव्यभिचारकत्वापत्तेः। नच पक्षे पक्षसमैवाव्यभिचारीनदोषायेति न तत्र संदिग्धव्यभि
चारकत्वं दोष इतिवाच्यं। प्रकृतेपि तुल्यत्वात् यद्वा त्रैवर्णिकसाधारणधर्मजनकत्वाभावप्रति योग्यध्य
यनविषयत्वरूपेण वेदत्वेन सर्ववेदपक्षकमेवोक्तानुमानं वेदाध्ययनसामान्याभावस्य चापि पापजनक
त्वेन तस्याः सामान्याभावव्यक्तेरेकस्याः प्रतियोगित्वमन्वमात्रा ध्ययनमादाय। ऽनेन रूपेण सर्वश्रुति
संग्रहः नच वेदत्वज्ञाने वेदाध्ययनाभावे पापजनकत्वबोधः वेदाध्ययनाभावे पापजनकत्वबो
धे च वेदत्वज्ञानमित्यन्योन्याश्रय इतिवाच्यं। तत्र हि नैतादृशवेदत्वमादाय वेदाध्ययनाभावज्ञानं प्रयो
जकं किंत्वदृष्टजनकेश्वरवाक्यत्वरूपवेदत्वमादाय ईश्वरानंगीकर्तृमीमांसकमते नित्यानुपूर्वीकवाक्यत्व
रूपवेदत्वमादाय स्फुटो न्योन्याश्रयाभावात्। नचैवं तेन रूपेणैव वेदस्य कथं न पक्षत्वमितिवाच्यं॥ उक्तरूप
योः प्रत्येकसाधारण[illegible]न्यतमसाधारणाभावात्। उभयमतसाधारणपक्षतावच्छेदकावच्छिन्न

यो रेकच

स्यैव विवादविषयत्वात्। उभयमतसाधारणपक्षतावच्छेदकं विनात देवच्छिन्ने विप्रतिपत्तेरसंभवा
दित्येवं पर्यवसितं आहुः। अस्मत्तु वेदत्वेन परिभाषितत्वं अभियुक्तानां परिभाषाविशेषरूपसंकेतसंबंधेन
वेदपदवत्वपर्यवसितं वेदत्वं अथवा खंडोपाधिविशेषरूपं वा वेदत्वमुक्तानुमाने पक्षतावच्छेदकमिति वदंतीति
संक्षेपः अधिकमस्मत्कृतेश्वरवादे द्रष्टव्यं। नच वेदस्य पौरुषेयत्वे स्वयंभरेषु भगवान्योगी तस्वयापु
राणिवाया अपि पर्यूता: स्मर्तृत्वस्य न कारकारतिस्मृतिविरोध इतिवाच्यं॥ अतिस्मृतो। विरोधेत्कृताति
रेव गरीयसी तिन्यायेन स्मृतिप्रतिपाद्यस्वयं भूत्वस्याप्रमाणत्वनुभूतजन्मत्वरूपतयाऽविरोधात्। नच
तथापि शब्दस्यानित्यतया वेदस्यापि तादृशजन्यत्वघटितं निरुक्तपौरुषेयत्वं न संभवतीति वाच्यं॥ उत्पन्नो गका
रः विनष्टो गकार इत्यादिप्रतीत्या शब्दस्यानित्यतया तत्समूहस्य वेदादेः सुतरामनित्यत्वात्। अत्र मी
मांसकाः लाघवात् ककारादयो वर्णा नित्या एकैका एव। उत्पत्तिविनाशप्रत्ययस्तु प्रागनुपलब्धोपलम्भ
मात्रत्वप्राग्पर्यन्धानुपलभ्यमानत्वरूपदोषात् भ्रम एव नच वर्णानां नित्यत्वे घटपदत्वादिकं दुर्वचं अ
व्यवहितोत्तरत्वस्य नित्येऽसंभवादितिवाच्यं॥ घज्ञानानंतरमव्यवधानेन रज्ञानं भवतीत्यभिप्रायविष
यत्वसंबंधेन घवत्त्वस्यैव घटपदत्वात्॥ शुकाद्युच्चरिते च घटपदे शिक्षकस्येश्वरस्य वाभिप्रायमादाय
तत्संभवात्। अथ सर्वेषां ककारादीनामेकत्वे तारस्तारतरमंदमंदतरादिविलक्षणप्रत्ययानुपपत्तिः।
नचैकस्यामेव ककारव्यक्तौ तारत्वतारतरत्वमंदत्वमंदतरत्वादिनानाधर्मस्वीकारान्नोक्तानु

पपत्तिरिति वाच्यं ॥ तारत्वादेस्तत्तद्व्यक्तिवृत्तित्वे जातित्वरूपतानुपपत्तेः । नच त्वन्मतेपि तारत्वादेर्जातित्व
मस्ति कत्वादिना सांकर्यप्रसंगादिति वाच्यं । कत्वादिव्याप्यनानातारत्वादेरुपगमात् । नन्वेवं तारत्वादिकं क
नानाकत्वादिकं वैकमित्यत्र विनिगमनाविरह इति वाच्यं ॥ कत्वादेर्नानात्वे तारमंदसाधारणककाराद्यनु
गतप्रत्ययानुपपत्तेरिति चेन्न तारत्वादेः कत्वादिव्याप्यनानाजातित्वे ककारादिसाधारणताराद्याकारानुग
तप्रत्ययानुपपत्तेः । नच तदसिद्धिः अनुभवापलापात् नच नानातारत्वादेः स्वाश्रयसजातीयसाक्षा
त्कारप्रतिबंधकतावच्छेदकशब्दवृत्तिजातित्वादिनानुगमात्ताराद्याकारानुगतप्रत्ययोपपत्तिरिति
वाच्यं । तादृशप्रतिबंधकतावच्छेदकत्वाद्यनुपस्थितावपि तादृशानुगतप्रत्ययोत्पत्तेः एतस्यापि स्वत्वघटि
तत्वेनाननुगतत्वाच्च । तस्मात्तारत्वतारतरत्वादिकमनुगतत्वाल्लाघवाच्च ककारगकारादिसाधा
रणमखंडोपाधिः तच्च सर्वमेकस्यामेव ककारादिव्यक्तौ वर्तत इति न तादृशप्रत्ययानुपपत्तिः अथवा ता
रत्वतारतरत्वादिकं वायुनिष्ठमेव जातिः तच्च दोषविशेषवशात् शब्दनिष्ठतया भासते दर्पणनिष्ठतया
मुखत्वादिरिव तत्वाचितारा[द्यु]त्पत्तिनियमार्थं वायुनिष्ठवैलक्षण्यस्यावश्यकतया तस्यैव लाघवेन तारत्वतार
तरत्वादिरूपताया उचितत्वात् । नच तस्य वायुधर्मत्वे श्रोत्रेंद्रियेण कथं तद्ग्रहः कर्णशष्कुल्यवच्छिन्नत्व
गिंद्रियोपनीतस्य श्रोत्रेण ज्ञानाभ्युपगमे तारत्वस्य शाब्दीत्वानुव्यवसायापत्तिः तारत्वं शृणोमीत्यनुव्यवसा
यानुपपत्तिश्चेति वाच्यं ॥ वायुनिष्ठधर्मान्तरस्य श्रोत्रायोग्यत्वेपि तारत्वादेस्तद्योग्यतास्वीकारात् योग्यतायाः
फलबलकल्प[...]श्रोत्रेण ग्रहः । न च निष्ठतारत्वादिप्रत्यक्षाभ्युपगमे श्रोत्रसंयुक्तसमवायेऽतिरिक्त

[...]प्योरेकत्र[...]
प्रत्यासत्तित्वकल्प[...]रिति वाच्यं । अगत्या सन्तस्यैव तारत्वादेः श्रोत्रेण ग्राह्यत्वं स्वन्यायेन क्रमेण विलक्षण
वायुसंयोगस्य तारत्वादिव्यंजकतयैवातिप्रसंगविरहात् । ननु तथापि ककारगकारादीनां नित्यत्वे ककाराद्येक
साक्षात्कारदशायां गकारादिसर्वशब्दसाक्षात्कारापत्तिः सर्वेषामेव शब्दानां सर्वदा कर्णशष्कुल्यवच्छेदेन स
त्वादिति चेन्न । मीमांसकनये वर्णानां प्रतिनियतजनकजन्यत्वाभ्युपगमेन ककाराद्युत्पादकविलक्षणवायुसंयोगस्ये
वास्मन्मते वर्णानां प्रतिनियतव्यंजकत्वाभ्युपगमेन ककारादिसाक्षात्कारजनकतयात्र द्विरहादेव युग
पदेव सर्वशब्दोपलब्ध्यसंभवात् कंठाद्यभिघातश्च तत्र विलक्षणवायुक्रियासंपादकत्वेनोपयुज्यते ननु मी
मांसकनये श्रावच्छेदकतासंबंधेन ककाराद्युत्पत्तिस्तत्र समवायसंबंधेन विलक्षणवायुसंयोग इति सामाना
धिकरण्यप्रत्यासत्त्या वायुसंयोगानां ककारादिहेतुत्वमतेन कर्णांतरे ककाराद्युत्पत्तिः तत्पुरुषीयशब्दलौकिक
साक्षात्कारं प्रति तत्पुरुषीयकर्णावच्छिन्नश्रोत्रसमवायस्यावच्छिन्नतासंबंधेन तत्पुरुषीयकर्णस्यवावि
षयनिष्ठतया हेतुत्वमतो न तत्पुरुषीयकर्णावच्छेदेनोत्पन्नशब्दस्य पुरुषांतरेण ग्रहणं ॥ त्वन्मते न्वत
त्र विलक्षणवायुसंयोगानां ककारादिसाक्षात्कारं प्रति कया प्रत्यासत्त्या हेतुत्वं अव्यवहितपूर्ववर्तितामात्रे
ण हेतुत्वे युगपत्सर्वशब्दोपलब्धेर्दुर्वारत्वात् । सर्वदैवावश्यं यत्किंचित्कर्णावच्छेदेन तत्तद्विलक्षणवायुसंयो
गसत्वात् । कर्णस्य ज्ञानानवच्छेदकतया स्वकर्णावच्छेदेन ककारादिसाक्षात्कारस्तत्र विलक्षणवायुसंयो
ग इति क्रमेण हेतुत्वासंभवात् । नच स्वीयकर्णावच्छिन्नविलक्षणवायुसंयोगस्य फलबलकल्प्यतया कका
रादिसाक्षात्कारदशायामेव तस्यात्मनि सत्वान्नातिप्रसंग इति वाच्यं । आत्मनो विभुत्वादेकस्य पुरुषस्य

कर्णावच्छेदेन विलक्षणवायोः संयोगदशायां सर्वेषामेव पुरुषाणामात्मनि तदवच्छेदेन विलक्षणवायोः संयो
गस्यावश्यकत्वेनातिप्रसंगतादवस्थ्यात्। न हि संयोगानिरूपे वैलक्षण्यं जनकतावच्छेदकं कर्मजन्यत्वावच्छे
दकसंयोगजन्यतावच्छेदकजातेर्नानात्वापत्तेः अपि तु वायुनिष्ठमेवेति चेन्न। ममापि तत्तत्पुंसंयोगानां श
रीरनिष्ठतया ककारादिसाक्षात्कारहेतुत्वात्। न चैवं हस्ताद्यवच्छेदेन विलक्षणवायोः संयोगस्य सत्त्वेपि कका
रादिसाक्षात्कारापत्तिरिति वाच्यं॥ कर्णावच्छिन्नविलक्षणवायुसंयोगेन हेतुत्वात्। पुरुषांतरीयकर्णेन पुरु
षांतरीयशरीरनिष्ठसंयोगो वच्छेदकः विलक्षणवायुसंयोगस्य फलबलकल्प्यतया ककारादिसाक्षात्कार
दशायामेव तस्य शरीरे सत्त्वेन हस्ताद्यवच्छिन्नसंयोगस्य फलत्वेपि न्नतिविरहाच्च। इत्थं च श्रोत्रसमवाया
देरपि न तत्त्वासत्तित्वं तत्तद्विलक्षणवायुसंयोगानां व्यंजकत्वस्यावश्यकतयैवानतिप्रसंगात्। न च तथापि
त्वाभियनये विलक्षणवायुसंयोगानां कत्वादिकमेव समनुगमेन कार्यतावच्छेदकं न त्वकमतेन्व ककारादिविषय
कसाक्षात्कारत्वमिति महागौरवं न्यायनये। अनंतककारादिकल्पने तत्तत्पुरुषीयशब्दसाक्षात्कारं प्रति तत्तत्पु
रुषीयश्रोत्रसमवायादेर्हेतुत्वकल्पनं च फलमुखमिति वाच्यं। व्यक्तिकल्पनास्थले फलमुखगौरवस्या
पि दोषत्वात्। ममापि लौकिकविषयतासंबंधेन ककारादिव्यक्तेरेकैकतया ककारादिकत्वाघोरविशेषाच्च
न वलथापि लौकिकविषयत्वस्य स्वरूपसंबंधात्मकस्याननुगततया कार्यतावच्छेदकतानियामकसंबंधत्वे राम
गौरवमिति वाच्यं॥ समवायवत् लौकिकविषयत्वस्याप्येकत्वात् तत्रापि समवायस्यैकत्वेन समवायसंबंधाव ३५
च्छिन्नाधारत्वस्य [illegible] व्यक्तिभिन्नतया स्वरूपसंबंधात्मकस्य कार्यतावच्छेदकतानियामकसंबंधत्वेन

[illegible] स्यपोरेकपद २७
ननुगमा[illegible]। न च तथापि तत्तद्वक्तृत्वादिरूपेण कादिव्यक्तिरवच्छेदिका न्याय्यपनयेतु स्वरूपतः कत्वादि
व्यक्तिरिति लाघ[illegible]इति वाच्यं॥ ममापि स्वरूपतः कादिव्यक्तेरवच्छेदकत्वात्। न च जात्यतिरिक्तपदार्थस्य किंचि
द्धर्मप्रकारेणैव भानमिति कथं कादिव्यक्तेः स्वरूपतोवच्छेदकत्वमिति वाच्यं। कादिव्यक्तेः स्वरूपतोवच्छेदक
त्वेपि कार्यकारणभावग्रहे कत्वादिरूपेण भानात्। न हि जात्यतिरिक्तपदार्थस्य किंचिद्रूपेणाभानवत् किंचि
द्रूपेणावच्छेदकत्वमित्यपि नियमोस्ति मानाभावात्। अथ तथापि तत्तल्लौकिकविषयतया कव्यक्तिरेवावच्छेदि
का लौकिकविषयत्वाकत्वं चेत्तत्र विनिगमकाभावात्कार्यकारणभावद्वयापत्तिः न च कत्वस्यावच्छेदकत्वेपि
विलक्षणवायुसंयोगाभावदशायां ककारसाक्षात्कारापत्त्या ककारव्यक्तेरवच्छेदकत्वावश्यकत्वमेव विनि
गमकमिति वाच्यं॥ एवं सति विलक्षणवायुसंयोगाभावदशायां कत्वसाक्षात्कारापत्त्या कत्वस्यावच्छेदक
त्वावश्यकत्वादिति चेन्न। ककारविषयककत्वसाक्षात्कारस्यालीकतया कत्वसाक्षात्कारसामग्रीविरहा
देव तदानीं कत्वसाक्षात्कारासंभवेन कत्वस्यानवच्छेदकत्वात् कोलाहलस्थले कत्वाविषयकस्यापि साक्षा
त्कारस्य सत्त्वेन कव्यक्तेरवच्छेदकत्वस्य चावश्यकत्वादिति वदंति। तदसत्। वर्णानां प्रतिनियतव्यंजकव्यंग्याः
एकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात् घटैकत्वपरिमाणवदित्यनुमानेन वर्णानां प्रति
नियतव्यंजकव्यंग्यत्वासिद्धौ ककारगकारादीनां नित्यत्वे ककाराद्येकसाक्षात्कारदशायां गकारादि
वशब्दसाक्षात्कारापत्तेर्बलवतोपि दुरुद्धरत्वात्। ननु वर्णानप्रतिनियतव्यंजकव्यंग्याः एकावच्छेदेन समान
देशत्वे सति समानेंद्रियग्राह्यत्वात् घटैकत्वपरिमाणवत्। इत्यत्र किं नाम प्रतिनियतव्यंजकव्यंग्यत्वं न तावत्

न्या·कौ· तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयत्वं तथा सति तथाविधविषयत्वाभावस्य प्रकृते साध्यतापत्तेः
घटैकत्वे घटरूपैकपृथक्त्वविषयकसाक्षात्कारजनकेऽपि तदेकत्वविषयकसाक्षात्कारजनकएकत्वविष
३६ यकतज्ज्ञानं तज्जन्यसाक्षात्कारविषयत्वस्य सत्वेन तथाविधसाध्याभावात् व्यभिचारस्तत्रैवेच्चेत्। स्वविषयक
साक्षात्काराजनकजन्यसाक्षात्कारविषयत्वत्वेति तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभू
तयघत्वंतद्भिन्नत्वस्य घटकतानुमाने साध्यत्वेनानुपपत्त्यभावात्। स्वपदेन प्रतियोगिपर्यन्तस्योपादानात्। एकाव
च्छेदेन यत्समानदेशत्वे सति यद्ग्राहकेन्द्रियग्राह्यं भवति तत्तत्स्वविषयकसाक्षात्काराजनकजन्यसाक्षात्कारवि
षयतत्वत्वे सति तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूतयघत्वंतत्त्वात् द्रूदकूटवदुद्भवती ति ध०
सामान्यमुखी व्याप्तिः। अनुमानप्रयोगस्तु रूपकारविषयकसाक्षात्कारविषयककारः स्वविषयकसाक्षात्का
राजनकजन्यसाक्षात्कारविषयरूपकारविषयकसाक्षात्कारविषयकसाक्षात्काराजनकजन्यसाक्षात्कार
विषयरूपकारकत्वे सति स्वविषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूतंपघत्वंतद्द्रूदकूट
वतएकावच्छेदेन स्वसमानदेशत्वे सति स्वग्राहकेन्द्रियग्राह्यत्वात्। घटैकपरिमाणवदित्यादिक्रमेण बोध्यं।
अत्राजनकत्वं फलानुपधानरूपं ग्राह्यं अतः रूपकारविषयकसाक्षात्काराजनकवायुसंयोगस्य ककारवि
षयकसाक्षात्काराजनकत्वस्वरूपयोग्यत्वेऽपि नयीमांसकनये सिद्धसाधनावकाशः। तत्र कथं तन्नयेतथा
विधस्वरूपयोग्यत्वं सिद्धिमिति तु नाशंकनीयं कदाचित्तद्विजातीयवायुसंयोगाभावः। ककाररूपकारविषयकस राम ३६
न्नतत्संव[illegible] तन्नयविधस्वरूपयोग्यत्वसंभवात् एवं चानैयायिकनये वाधवारणाय रूपविषय

नवांछि[illegible]न्योरेकघटव
[illegible]कारविषय
कसाक्षात्[illegible] प्यपन्नतावच्छेदककोटौ निवेशः। अन्यथा एकैकमात्रविषयकसाक्षात्काराजनकस्य एकैक
मात्रविषयकसा[illegible]त्काररूपफलानुपधायकतया वाधवारणासंभवात्। नन्वेवं सत्यपि तदर्शिनसामान्यव्या
प्तौ घटवत्येकपृथक्त्वमादाय निरुक्तहेतुमालिनि घटैकत्वे व्यभिचारः तत्र एकत्वविषयकसाक्षात्कारानुपधाय
कीभूतंयत् एकत्वग्रहप्रतिबंधकदोषादिकालीनएकपृथक्त्वज्ञानरूपकारणं तज्जन्यसाक्षात्कारविषयत्वस्य
एकपृथक्त्वे सत्वेन एकपृथक्त्वग्रहप्रतिबंधकदोषादिसमवधानकालीनं यत् एकत्वज्ञानरूपकारणं तज्ज
न्यसाक्षात्कारविषयत्वस्य एकत्वे सत्वेन च निरुक्तसाध्याभावसत्वादिति वाच्यं। तत्तत्साक्षात्काराजनकेत तत्साक्षा
त्कारप्रतिबंधकासमवहिततत्वस्यापि निवेशनीयत्वादितितथा च यत् एकावच्छेदेन यत्समानदेशत्वे सति यद्ग्रा
हकेन्द्रियग्राह्यं तत्तत्स्वविषयकसाक्षात्कारानुपधायकं यत् तद्विषयकसाक्षात्कारप्रतिबंधकासमवहितका
रणं तन्निष्ठफलोपधायकतानिरूपकसाक्षात्कारविषयतत्वत्वे सति तद्विषयकसाक्षात्कारानुपधायकं यत्
तद्विषयकसाक्षात्कारप्रतिबंधकासमवहितकारणं तन्निष्ठफलोपधायकतानिरूपकसाक्षात्कारविषयी
भूतं यघत्वंतत्त्वं द्रूदकूटवदुद्भवतीति सामान्यमुखव्याप्तिनिष्कर्षः अत्र तथाविधकारणनिष्ठफलोपधायक
तानिरूपकत्वनिवेशात् घटवृत्त्येकपृथक्त्वादिसाक्षात्कारानुपधायकं यदितरकारणसमवहितात्ममनःसंयो
गादिकं तदीयस्वरूपयोग्यताभादाय तथाविधैकपृथक्त्वादौ निरुक्तपरस्पराव्यंजकव्यंग्यत्वसत्वेऽपि न क्षतिः।
विभिन्नकालीनपाकजैक॥ घटवृत्तिगंधद्वयएकगंधविषयकसाक्षात्कारानुपधायकापरगंधजन्यसाक्षात्का
रविषयो व्यभिचारवारणाय एकावच्छेदेनेति॥ स्वावच्छेदककालानवच्छिन्नतत्कं यघत्वंतत्त्वं द्रूदकूटवत्वार्थकं

न्या॰ कौ॰ नातः घटनाशे घटध्वंसस्य व्याप्यवृत्तित्वेऽपि हेतुः स्वरूपासिद्धः। केचित्तु व्याप्यवृत्तेरपि प्रतीतिबलात् कालावच्छेदकत्वाभ्यु
पगमे क्षतिविरहात् एककालावच्छेदेनैतस्य एककालावच्छिन्नत्वे सतीति यथाश्रुतार्थ एव समीचीन इत्याहुः। एवं च वि
३७ भिन्नसंस्थानविशेषव्यंग्ययोर्गोत्वाश्वत्वयोर्व्यभिचारवारणाय समानदेशत्वे सतीति। विशेषणं समाननियताधिकरण
त्वार्थकं नातः एककालावच्छिन्नयोरेकरूपेण प्रतियोगिकशाखावासंयोगवत्तत्संयोगयोः रूपेण रूपैकदेशावृत्तित्वेऽपि व्यभि
चारः। न चैवमपि एककालावच्छिन्नरूपेण घटत्वावच्छिन्नरूपेण च तत्संयोगयोर्व्यभिचारः तत्र परस्परविषयक
साक्षात्कारजनक परस्परावच्छेदकावच्छिन्नसन्निकर्षजन्यसाक्षात्कारविषयत्वेन निरुक्तसाध्याभासत्वादृशि
यार्थं। विभिन्नदेशानवच्छिन्नत्वस्यापि निवेशनीयत्वात्। न चैवं सति समनियताधिकरणतार्थकं समानदे
शत्वविशेषणं व्यर्थं उपदर्शितरूपेण प्रतियोगिकशाखावत्तत्संयोगयोः शाखाघटवयवत्तदवयवरूपपरस्प
रविभिन्नावच्छेदकावच्छिन्नत्वेन तथाविधानवच्छिन्नत्वविशेषणेनैव वारणसंभवादिति वाच्यम्॥ एवम
पि घटावधिकघटकुम्भवृत्तिद्वित्वपृथक्त्वपरावधिकघटकुम्भवृत्तिद्वित्वपृथक्त्वयोरेककालावच्छिन्नयोः स्वस्वा
वधिज्ञानव्यंग्ययोर्व्यभिचारवारणाय तदुपादानस्यावश्यकत्वात्॥ न चैवं पक्षधरमिश्रसतोर्दर्शितस्थल ५६
व्याप्तिविरोधः। तावतापि तत्र स्वाभावात्। तदर्थस्यापि लक्षणपरत्वात्। अत्र विभिन्नदेशानवच्छिन्नत्वस्य
वच्छिन्नत्वस्य भिन्नदेशावच्छिन्नत्वोभयसंबंधावच्छिन्नप्रतियोगिताकाभावविशिष्टत्वं तेन विभि राम
न्नदेशानवच्छिन्नत्वस्य दुर्वचत्वापत्तिरिति। अत्र पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्य ३७
त्वान्नैयायि[illegible] भिन्नदेशावच्छिन्नस्वकारविषयकसाक्षात्कारविषयककारे हेतोर्नांशासिद्धिस्तन्मते
समानदेश[illegible] विधिवर्णादय मात्स्येव पक्षे हेतुमत्वसंभवादिति। एककालावच्छिन्नयोः किंचिद्

[illegible] नयोरेकघटवृत्तिरसगंधयोर्व्यभिचारवारणाय समानेंद्रियग्राह्यत्वादिति तत्र दूरकेंद्रियजन्यलौ
किकसा[illegible]कारविषयत्वादित्यर्थः। ज्ञातस्तत्पुरुषीयापेक्षाबुद्धिजन्य द्वित्वप्रत्यक्षप्रति तत्पुरुषीयापेक्षाबुद्धे
र्हेतुत्वे [illegible] तः। न चैवमपि स्वस्वावधिज्ञानव्यंग्ययोर्घटवृत्त्येकपुरुषोत्पत्तिकदीर्घत्वयोर्व्यभिचार इति वाच्यम्॥ इत्थं
वित्तित्वादिरूपदीर्घत्वत्वव्याप्यजातिपुरस्कारेण दीर्घत्वग्रहे तदवधिज्ञानस्य हेतुत्वत्यादीर्घत्वत्वरूपेण दीर्घत्वग्र
हे अवधिज्ञानस्य हेतुत्वानभ्युपगमेनानुपपत्त्यभावादिति। अथ वर्णाः प्रतिनियतव्यंजकव्यंग्याः स्युः इत्याह
केंद्रियग्राह्यत्वे लौकिकसाक्षात्कारविषयतदाश्रयकत्वात् घटरसगंधवदिति सत्प्रतिपक्षसत्वान्नोक्तरी
त्या वर्णानां प्रतिनियतव्यंजकव्यंग्यत्वाभावसिद्धिः संभवति पक्षेऽपि दर्शितसाध्यस्याप्रतियोग्येवात्र साध्यं
पक्षोऽपि पूर्ववदेव तेन न सत्प्रतिपक्षानुपपत्तिरिति निवेश्य समहालंबनसाक्षात्कारमात्रविषययोर्गंधयोर्व्य
वर्णा॰ ७ भिचारेण सत्प्रतिपक्षासंभवात्। वस्तुतस्तेनानुक्तरीत्याऽनित्यत्वे घटादीनामपि नित्यत्वापत्तिः। तत्राप्ये
कजातीयानां सर्वेषां घटानामेकत्वस्य नित्यत्वस्य च लाघवेन वक्तुं शक्यत्वात्। तत्तद्वयवसंयोगादिरूपप्र
तिनियतव्यंजकव्यंग्यत्वस्य तत्राभ्युपगमेनैकघटादिसाक्षात्कारदशायां सकलघटादिसाक्षात्कारापत्
त्तिर्न वा सर्वदा तत्संभापत्तिः उत्पादादिप्रत्ययस्यापि शब्दस्थल एव भ्रमत्वस्य सुवचत्वात्। अथ तन्ना
शत्वेन तत्समवेतनाशत्वेन कार्यकारणभावात् कपालनाशेन घटनाशस्य दुर्वारतया घटस्य नित्यत्वासंभ
वः न च जात्यादिना शवारणाय स्वप्रतियोगिजन्यत्वस्य नाशकतावच्छेदकसंबंधतया घटादेर्नित्यत्वे स्वप्र
तियोगिजन्यत्वविरहादेव न नाश इति वाच्यम्। लाघवात् स्वप्रतियोगिसमवेतत्वस्यैव नाशकतावच्छेदक

संबंधत्वात्। अनंतघटादिकल्पनागौरवस्यफलमुखत्वेनादोषत्वात् सत्वेन ध्वंसत्वेन नाश्यनाशकता
वांतरादेवजात्यादेरपि नाशोपपत्तेः अनंतस्यलेस्यच प्रतियोगिजन्यत्वस्यनाशकतावच्छेदकसंबंधत्वक
ल्पनामपेक्ष्यातिरिक्तैकनाश्यनाशकभावकल्पनायालघुत्वादिति चेन्न। व्यक्तिकल्पनास्थलेफलमुखगौ
रवस्यापिदोषत्वात् तुल्ययुक्त्या कपालिकादेरपि नित्यत्वस्य सुवचतया तन्नाशेन घटादिनाशाप्रत्यसं
भवाच्च। किंचैव मपि स्मुखवादीनां नित्यत्वैकत्वयोगायतिर्दुर्वारा तत्सम वाधिनो नित्यत्वयोक्तरीत्यात्र ना
शायत्संभवादिति दिक्। तस्माद्वर्णानामनित्यत्वे सिद्धे वेदनित्यत्वमूलएव निहितः कुठारः। अथमास्त
ध्वंसाप्रतियोगित्वरूपं नित्यत्वं वेदस्य तथापि परंपरापुरुषपरंपराधीनतया प्रवाहाविच्छेदरूपे नित्य
त्वे बाधकाभावः। एवंच नित्यत्वेन निर्दोषतया च वेदप्रामाण्यसिद्धौ सर्वज्ञे वेदवक्तरि ईश्वरे प्रमा
णाभावेनोक्तरीत्या वेदस्यापौरुषेयत्वासिद्धिरिति चेन्न। स्मृत्याचारानुमितवेदानामुच्छेददर्शनेन तद्दृष्टां
तेन सर्ववेदउच्छित्यं वेदत्वात् स्मृत्याचारानुमितवेदवदित्यनुमानेन सर्ववेदानामुच्छेदसिद्धेः सजातीय
ध्वंससमव्यापकप्रागभावप्रतियोगित्वरूपप्रवाहाविच्छेदस्यासंभवात्। स्यादेतत्। स्मृत्याचारानु
मितवेदानामुच्छेदएवासिद्धस्तेषां नित्यानुमेयत्वात् प्रवाहाविच्छेदोपि सर्वदा तुल्यरूपता साचकालो
पाधित्वा [illegible] काध्ययनविषयत्वानवच्छिन्नत्वं तच्च सर्वदाध्ययनविषये प्रत्यक्षवेदेऽध्ययनाविषयेनि
त्यानुमेये [illegible] चास्ति अनुमानं च विवादपदम् पूर्वबोधिकास्मृतिः स्मृत्यर्थानुभवजनकवेदमूलाऽनु
विगीत महाजनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलकस्मृतिवत् अत्रप्रत्यक्षवेदमूलकस्मृताव

[illegible] साधनत्वावारणाय विवादपदमिति। तदपर्यंक्त। इदानी प्रत्यक्षा [illegible] वेदमूलकत्वेपि तदुपरक्ते पु
[illegible] इतिन्यायमूलकस्मृतावंशतो बाधवारणायापूर्वबोधिकेति वस्तुतो विवादपदत्वेऽ
नयदासि [illegible] ग्रन्थान्तरकोटिकाम्पुत्र एवंच न्यायमूलकस्मृतेरप्यनेनैववारणोऽपूर्वबोधकत्वं नदेयमेव
[illegible] तावविगीतपदं संक्रान्तो [illegible] वेदस्तिनो बौद्धागमस्यादि तोऽभमूलकस्मृतौ व्यभिचारवारणाय तच्चप्र
माणवदप्रा [illegible] न्यायमूलकस्मृतौ व्यभिचारवारणाय महाजनेत्यादि तच्छ्लोकिक प्रमाणविषयार्थके
वेदत्वव्यभिचारवारणाय स्मृतीति तत्र स्मृतित्वेन पक्षसिद्धार्थपर्यकं वस्तुतो मन्वादि प्रणीतत्वमेव स्मृ
तित्वं एवंच लोकमूलकस्मृतौ व्यभिचारवारणायाविगीतेति नदेयं साध्येवेदमूलत्वं स्वजन्यानुभवप्रा
गभावजन्यत्वं घटादौ ज्ञानादि व्यवहितस्य कुविंदादेरिव स्मृतावपि ज्ञानादि व्यवहितस्य वेदस्य जन
कत्वान्नबाधसंभावना तादृशजनकत्वं चाज्ञातस्याध्ययनस्य न संभवतीति पक्षधर्मताबलान्नित्यानुमे
यप्रत्यक्षवेदसिद्धिः अध्ययनविषयवेदत्वस्य सार्वदिकाध्ययनविषयत्वव्याप्यत्वेन व्यापकाभावा
दध्ययनविषयत्वस्य चत्रासंभवात्। अध्ययनाभावो नित्यानुमेया [illegible] दिकं कृत्वा लिप्यादिनाऽन्येभ्यः प्रति
पादयितेत्येश्वरेणापि स्वाभिप्रायस्यापि वेदः स्मृतिकर्तृभ्यो मन्वादिऋषिभ्यो लिप्यादिना प्रतिपा
दितेऽनंतरं च तैस्तस्मादर्थं प्रतीत्य स्मृतयः प्रणीयंत इति कथमध्ययनविषयत्वाभावेपि वेदात्वस्य
तिप्रणयनं संभवतीति न पक्षधर्मताबलादपि नित्यानुमेयवेदसिद्धिः संभवतीति चेन्न वेदस्य
उच्चारणाद्यभिव्यक्तानुपूर्वीमत्वतच्छून्यत्वाभ्यां द्विविधतया तत्रानुपूर्वीकल्पने गौरवेणाघवि

तस्या

न्या. कौ. धायाः असंभवेन द्वितीयविधायामेव पर्यवसानेन मो । निश्लोकादिवैषम्यात् । नन्वतर्हि पूर्वीहीनस्य क
र्थंबोधकतासंभवः आनुपूर्वीमत्वेन ज्ञानस्य शाब्दबोधसामग्रीघटकत्वात् अन्यथा नदीदीनस्तराशा
३९ जेत्पस्याप्यविशेषेण बोधकतापत्तेरितिवाच्यं ॥ तदर्थज्ञापकत्वेन ज्ञानघटितसामग्र्या एव धज्ञकृते
शाब्दबोधजनकत्वोपगमेन स्मृत्यर्थानुभावकत्वेन ज्ञानादेव वेदार्थप्रतीतिसंभवेन बोधकता
संभवात् न चैवं स्मृत्यर्थबोधकत्वेन वेदानुमितौ स्मृत्यर्थस्य विषयतया तद्बोधकवेदस्यानुवादकत्वा
पत्तिरितिवाच्यं ॥ कार्येण कारणानुमाने कारणकारणतावच्छेदकातिरिक्तस्य व्याप्तिज्ञानविषयव्या
पकतावच्छेदकस्य विशेषणत्वेपि न विषयत्वमिति तत्सिद्धांतात् व्यापकस्तौ मानसप्रत्यक्षाया व्या
कस्य ज्ञानांतरोपनीतस्य संज्ञिज्ञाने संज्ञायाश्च ज्ञानांतरोपनीताया विशेषणत्वेपि न विषयत्व
मिति तैरंगीकारात् । न च विशेषणत्वस्य विषयतात्मकत्वेन विषयत्वानावेक्यं विशेषणत्वमिति
वाच्यं । विशेषणत्वस्य नास्माकं धर्मताकत्वरूपतया ज्ञानांतरोपनीतस्य संसर्गतया धर्मत्वक
त्वेतद्विशेषणत्वस्य ज्ञाते तद्विशिष्टज्ञानत्वस्य च संभवात् न च ज्ञानांतरोपनीतस्य वेदार्थस्यानु
मितिविषयत्वेपि ज्ञानांतरमादाय वेदस्यानुवादकतापत्तिरितिवाच्यं ॥ वेदार्थग्राहकस्य ज्ञानां राम
तरस्य स्मृतिजन्यतया प्रमाणांतरत्वाभावेन प्रमाणांतरागृहीतार्थग्राहकत्वरूपानुवादकत्वा ३९
भावविधिकधाप्यघटितस्य वेदत्वं न संभवति उत्पत्ते रमित्यक्ते मो निश्लोकवृद्धिभाया हेतु
तोप्यो[illegible]मासंभवात् । आनुपूर्वीहीनवर्णमात्रस्यैव निरर्थकत्वात् न चानुपूर्वीसहितस्यैव वे

दस्यानु[illegible]ज्ञानदोष इति वाच्यं । तस्या नानात्वेन विशिष्य ज्ञानासंभवादिति चेन्न । हस्तकरादिपदानां
घटमा[illegible]कलशमानयानयघटमित्यादीनां च प्रत्येकं व्यभिचारेण शाब्दबोधे पदानां वाक्यानां
चानुपूर्वीज्ञानस्याहेतुत्वात् किंतु तदर्थज्ञापकत्वेन ज्ञानमेव तत्र हेतुः तच्च प्रकृतेप्यस्ति तदर्थ
मेव च वक्रचिदर्णस्वरूपमविशेषणमुपयोगः अत एव कुशमानयेत्यादौ शकारसंदेहे क्रियोच्चार
णे वा हस्तकरादिसंदेहेपि शाब्दबोधः अत एव दृष्टं चास्मत्तत्र क्लिंगमिति शाब्दात् प्रतीतेन धूमे
नालोकेन वा वह्निरनुमानेन तु तदर्थज्ञापकत्वेन ज्ञानात् पदार्थोपस्थितिमात्रं जन्यते न तु वाक्यार्थ
बोधः नामत्वविभक्तित्वादिनाज्ञानं विना कांक्षादिज्ञानासंभवेन तदसंभवात् न च तदर्थज्ञापक
त्वेन ज्ञानहेतुतामते आकांक्षादिज्ञानस्य न तत्र हेतुतेतिवाच्यं ॥ तथा सति घटः कर्मत्वमानयनं कृति
रित्यादिनिराकांक्षवाक्यादपि घटकर्मकानयनकृतिबोधकत्वेन ज्ञाने पि घटमानयेत्यादिवाक्या
दिव शाब्दबोधापत्तेः एवं च कर्मत्वाद्युपस्थापकविभक्त्यादिमद्विशेषत्वादिना ज्ञानं विना तदर्थज्ञा
पकत्वज्ञानमात्रात् कथं शाब्दबोधः न चैवं कुशमानयेत्यादौ शकारादिसंदेहे कथं शाब्दबोध इति
वाच्यं । तत्रापि सामान्यतस्तथा ज्ञानसत्त्वात् [illegible]नन्तुगमेन तत्तद्विभक्त्यादिमद्विशेषज्ञानत्वादिना
हेतुत्वासंभवादिति चेन्न । घटः कर्मत्वमित्याद्यन्वयविरोधिपदाजन्योपस्थितित्वादिनैव तत्र हेतु
त्वात् । वस्तुतस्तु नानापदजन्यपदार्थोपस्थित्या यत्र शाब्दबोधस्तत्रैवानुपूर्वीज्ञानस्य हेतु

तथा तं विनाप्यनुमितवेदात् शाब्दबोधे बाधकाभावः न चानुपूर्वीज्ञानघटितसामग्र्या अन्यत्र शा
ब्दबोधजनकत्वेन क्लृप्ताया अत्राभावे कथं शाब्दबोध इति वाच्यं। अत्र तदर्थज्ञापकत्वेन ज्ञानघ
टितापाधर्मिग्राहकमानसिद्धया विलक्षणसामग्र्या एव शाब्दबोधजनकत्वोपगमात् न न च क्लृप्त
सामग्र्यभावेपि विलक्षणसामग्र्यंतरेण कथं कार्योत्पत्तिर् दृष्टगोचरत्वादिति वाच्यं॥ तथा सति
तव घटादिकार्यकर्तुः शरीरापेक्षापाजनकत्वस्य दृष्टत्वात् तयाद्वित्यादिकार्ये ईश्वरस्याशरीरिणः
शरीरापेक्षां विनैव जनकत्वस्यानुपपत्तेः। कार्यवैलक्षण्यात् सामग्रीवैलक्षण्यापत्तेश्च प्रकृते
प्यदोषात्। एवं च नित्यानुमेयवेदस्य लिंगवर्णपदविभक्त्यादिविशेषघटितत्वे नाज्ञानस्याखंड
स्य वाक्यार्थानुभावकत्वात् तत्र पदार्थस्यानायोगो वाक्यार्थः। अस्तु वा सखंडस्यैव वाक्यार्थानुभा
वकत्वम् अखंडत्वे स्मा कमायरू भावात् न च तदानुपूर्व्या नानात्वात् विशिष्यानिश्चये कथं शाब्द
बोध इति वाच्यं। अविलक्षणया एव सामग्र्याः स्वीकारात् न च क्रमहेतुं विना न सोनुभाव
क इति वाच्यं॥ तस्यासिद्धावाश्रयासिद्धेः सिद्धौ च बाधः तेन विनैव सर्वानुपपत्तिं परिक
म धर्मिग्राहकमानेन तदनुभावकत्वसिद्धेः अतएव क्वचिन्निरूपितं विधिनिषे
धक[illegible]दर्थप्रतीत्यप्रवृत्तिनिवृत्ती अन्यथा विधिनिषेधकानां नानाविधत्वेन विशेषा
[illegible] नवान्नततोर्थधीःस्यात् एवं मंगलाचारे च विगीत[illegible]शिष्टाचारत्वेन कर्तव्यता

[illegible] कर्तव्यतावेदबोधिता लौकिकाविगीत[illegible]शिष्टाचारकर्तव्यतात्वादिति वेदानुमानं मं
गलमा[illegible] इत्यादिविशेषाकारेणानुमितवेदानुमानं तथा व्याप्त्यभावात् न चास्तु प्रत्यक्षवेदानुमानं
प्रत्यक्षते उच्छेदानुपपत्तेः प्रत्यक्षशाखावत् प्रत्यक्षका। कार्या। कार्या अष्टकाइत्येवंरूपमेव वाक्य
मनुमेयमिति। तन्न। नानावेदकल्पने गौरवात् मन्वादिस्मृतिमूलं हि तानेकविधं दृष्टमिति कथ
माधुनिकोनेकवेदमनुमिनुयात् न च स्मृत्यर्थबोधको वेदः स्मृतिसदृश एवानुमेयः। स्मृतेर्नाना
विधत्वात् तस्य च प्रदोषादावनुस्मृतिस्यैव वेदत्वं श्रोत्रग्रहणं हि तथा शब्दत्वं वा वाक्यार्थबोधक
त्वादिस्तु स्मृत्याचारामूलानुमितो वेदोर्थं बोधयतीति पूर्वपूर्वेणानुमितवेदात्तदुत्तरो
त्तरस्मृत्याचारावित्थं परंपरास्वतंत्रप्रमाणमूलकत्वात् तस्माद्वेदस्य नित्यानुमेयत्वं न तद
भेद इति। अत्रोच्यते उच्छिन्नवेदादर्थप्रतीत्यस्मृत्याचारयोरुपपत्तेः सामग्र्यंतरकल्पने माना
भावः अतएव नाश्रयासिद्धिर्न वा बाधः। स्मृत्याचारानुमितस्य तस्यास्माभिरभ्युपगमात्॥
न च तस्मात् कथं बोधः आनुपूर्वीसाहित्यात्। न च तत्र मानाभावः यदि स वेद आनुपूर्वीरहितः
स्यात् तदा ननुभावकः स्यादिति तर्कसहकृतानुमानस्यैव मानत्वात् एवं च स्मृत्याचारयो
र्वेदजनानुभवमूलकत्वानुमानादेव पक्षधर्मताबलात्। प्रत्यक्षवेदमूलकत्वसिद्धिः अन्यथा
नुभावकत्वाभावेन तस्य मूलत्वानुपपत्तेः। तस्मात् स्मृत्याचारानुमितो वेदः प्रत्यक्षाध्ययन

विषयः वेदत्वात्। संमतवत्। उच्छेदस्त्वाधुनिकानामहरहरपचीयमानशक्तिकत्वात् स्मृतिनिंदा
वाक्यान्यान्यप्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्पनेन तु विधायकनिषेधकं च
वाक्यं गौरवादुक्तं छेदान्तु। यत्र चार्थवादे देवतदर्थो वगम्यस्तत्र न तत्कल्पनापि प्रयोजनं तरति मृत्युं
तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्यादौ। न च तस्याध्ययनविषयत्वे बहुनिर्मूलाविनिर्धारण
संभवेन कथमुच्छेद इति वाच्यं। एकस्य सकलशाखाध्ययने सामर्थ्याभावात्। कैश्चिदपरैरण
पितदनध्ययने शाखोच्छेदसंभवात्। शाखात्वस्यैव प्रत्यक्षशाखात्वस्यापि सार्वादिकाध्ययनवि
षयत्वव्याप्यत्वे मानाभावात् न च सकलशाखाविदां व्यासादीनां सत्त्वात् कथमुच्छेद इति वाच्यं॥ अ
ध्ययनाभावस्यैवोच्छेदपदार्थत्वात् अथ शाखोच्छेदे वर्णपदवाक्यहानिशंका योऽप्यस्ति तद्वेदादपि
वाक्यार्थप्रयोगयोरनिश्चये वैदिकव्यवहारमात्रविलोपापत्तिरिति चेन्न॥ अप्रमाणे वेदस्यैवम
नुजनपरिग्रहेणानन्तमूलकानुष्ठानसंभवात्। एतेन सर्वबोधितशाखाबोधितांगकल्पासु देहे
न सर्वत्रानाश्वासप्रसंग इत्यपि निरस्तं॥ सति चानेकशाखाबोधिते तत्कर्मणि कर्त्रैताबोधि
काम्न्वादिस्मृतयः कालक्रमेनाविनमेतादृशाम नाश्वासमाशंक्यैव तैस्तत्स्मृतिप्रणयनात्
न च स्मृ[illegible]चारयोर्महाजनपरिग्रहादेव प्रामाण्यमस्तु किं वेदेनेति वाच्यं॥ प्रलये स्मृत्याचारयोरु
[illegible]च्छेदात् सर्गादौ नित्यसर्वज्ञेश्वरप्रणीतवेदमूलकत्वस्य स्मृत्याचारयोरावश्यकत्वात्

[illegible]कानां धर्मपरंपरायातप्रसंगात् मन्वादीनां तदानींतनत्वेऽपि दर्शितत्वं तदुपाध्यश्रवणप्रभावा
त्पूर्वसर्गीयसिद्धसार्वज्ञकल्पने प्रतिसर्गं तेषां मन्वाद्यत्वकल्पने च गौरवं एकस्यैव नित्यसर्वज्ञस्य कल्प
नाया न्याय्यत्वात्। न चेश्वरप्रणीताः स्मृतय एव संत्विति वाच्यं। तासां मन्वादिप्रणीतत्वेन वेदमूलकत्वे
न स्मृतिघेव स्मृतेः तदुक्तं प्रतिमन्वंतरं चैषा श्रुतिरन्या विधीयत इति अत्र विधानमेवान्यत्वं न त्वानुपू
र्वीभेदः तत्तद्दृष्टविशेषतत्तदानुपूर्व्या एव जनकत्वे नानुपूर्वीभेदासंभवात्तस्मात्पूर्वं प्रत्यक्षवेदमू
लावेव स्मृत्याचारौ अग्रे च कालक्रमेणासुरांशोपबलभ्रष्टाग्रहणधारणादिशक्तेरहरहरपचीयमान
त्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्तव्यतामधिगम्य प्रवृत्तिः न च तथापि
स्मृतिरेवास्तु वेदमूलामंगलाचारस्त्वीश्वराचारादेव शिष्टलिप्स्वादिसंप्रदायवदिति वाच्यं॥ प्रकुर्वाणा
श्चरितस्य तत्तदाचारस्य गुरुत्वेन मंगलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात्। न च मंगलादि
पदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यं॥ सर्गादिपदवहाक्यादेव तदुपपत्तेः अत एव वचनमा
त्राद्यवचनप्रवृत्तिस्तत्रैव परीक्षकाणामाचारापेक्षेति निर्वलयासिद्धाद्युच्छेदोऽसंभावित इति वाच्यं॥ प्र
लयनाहरासीन्नरात्रिरासीदित्यादिश्रुत्यनुगृहीतानां मनुप्रमाणानां प्रमाणत्वापातः पूर्वमेव व्यवस्थाप
नात्। तस्मादुपदर्शितरीत्येश्वरकर्तृकत्वेन वेदप्रामाण्यसिद्धौ बाधकाभावेन वेदापौरुषेयत्वासिद्धि
रविकलेति कृतमति प्रायविस्तरेण। सोऽयं शब्दो द्विविधः विधिरर्थवादश्च विधित्वं च प्रवर्तनार्थक

लिङादिघटितत्वं प्रवर्त्तनात्वं च प्रवृत्त्यनुकूलव्यापारत्वं प्रवृत्तिजनकज्ञानविषयत्वपर्यवसन्नं
इत्थं च प्रवर्त्तनाया लिङर्थत्वस्य सर्वसंमतत्तया कृतिसाध्यत्वं बलवदनिष्टाननुबंधित्वं इष्टसाध
नत्वं च लिङर्थः समुद्रपारगमनादौ कलंजभक्षणादौ चैत्यवंदनादौ च प्रवृत्त्यनुत्पत्त्यापत्तेस्तत्रितय
ज्ञानस्यैव प्रवर्त्तकत्वात्। सुप्सुवंतादिपदस्य स्वरूपेण च इवाघोरिवलिङस्त्रितयैकशक्तेरुपगमान्नैकस्या
लिङस्त्रितयबोधकत्वानुपपत्तिः अथ कृतिसाध्यत्वे लिङो न शक्तिः लाघवेन साध्यतासंबंधेन कृति
प्रकारकज्ञानस्यैव प्रवृत्तिजनकत्वोपगमेनाख्यातत्वेनाख्यातसामान्यशक्त्योपस्थापितायाः कृतेस्सा
ध्यतासंबंधेन यागादावन्वयोपगमे नैव पर्यवसितत्वादौ प्रवृत्तिसंभवात् कृतिसाध्यत्वतादृशज्ञानाभावे
प्रवृत्त्यसंभवाच्चेति चेन्न आख्यातत्वस्यैकस्याननुगतस्याभावेन तत्त्वेन तस्याप्येव शक्ततावच्छेदक
तया लिङत्वावच्छिन्नस्य कृतिसाध्यत्वत्वावच्छिन्ने एव शक्तिकल्पनात्। न च लिङत्वावच्छिन्नस्यापि लाघवा
त्कृतित्वमेव शक्ततावच्छेदकमस्तु इति वाच्यं पदान्नियतोपस्थितेर्कृतिसाध्यत्वेन यत्पदात् तादृशधर्मप्र
कारेण नियतोपस्थितिस्तस्य तादृशधर्मस्यैव तत्पदशक्ततावच्छेदकत्वनियमान्यथानुभवानुरोधेन लिङः कृति
साध्यत्वत्वावच्छिन्ने शक्तिकल्पने गौरवस्याकिंचित्करत्वात् अन्यथा वेदपदादेरपि गुरुधर्मावच्छिन्ने शक्ति
सिद्धिर्न स्यादित्यापत्तेः पंचतीत्यादावाख्यातसामान्यशक्त्युपस्थाप्यकृतेर्धात्वर्थविशेष्यत्वेनैवान्वयस्यानुभ
वतया [illegible] त्यादौ तस्य धात्वर्थविशेषणतयान्वयासंभवाच्च। ननु मुख्यत्तिर्नदप्रयत्नान्नदोषरतिवाच्यं।

[illegible] स्य शक्तिर्नेदं [illegible] निर्वाहस्तथा शक्तिभेदस्यावश्यकत्वेनुक्तरीत्या [illegible] कृतिसाध्यत्वत्वावच्छिन्न
एवालदौ [illegible] नात्। अयमाशयः कृतिसाध्यत्वे लिङः शक्तिः कल्प्यसाध्ये प्रवृत्तिवारणं तु कृतिसाध्यत्वज्ञानस्य प्रव
त्तिहेतुत्वकल्पनादेव स्यात् नैनं प्रवर्त्तकज्ञानस्य विधिजन्यत्वनियमनिर्वाहाय लिङस्तत्र शक्तिरेवावश्यकीति वाच्यं वं
तत्र लिङः शक्त्यंगीकारे विनादश नियमानिर्वाहात्। तथा हि इदानीतनकल्प्यसाध्ये कालांतरीयकृतिसाध्ये वावि
पोर्थराज्यादाविदानीतनकल्प्यसाध्यताज्ञानदशायामपि कालांतरीयकृतिसाध्यताज्ञानसत्वात्प्रवृत्त्यापत्तिः॥
एवं स्वकल्प्यसाध्येष्वनु मद्यादि पुरुषांतरीयकृतिसाध्ये समुद्रोल्लंघनादौ स्वकल्प्यसाध्यताज्ञानदशायामपि ह
नुमदादिपुरुषांतरीयकृतिसाध्यताज्ञानात्प्रवृत्त्यापत्तिरिति तत्तत्कालीनतत्तत्पुरुषीयप्रवृत्तिं प्रति तत्तत्का
लीनतत्तत्पुरुषीयकृतिसाध्यताज्ञानस्यैव हेतुत्वं वाच्यं॥ तथा च तादृशज्ञानस्य न विधिजन्यत्वं तत्तत्कालतत्त
त्पुरुषांतर्भावेन कृतिसाध्यत्वे लिङः शक्त्यभावादिति चेन्न प्रवर्त्तकज्ञानस्य विधिप्रयोज्यत्वनियमनिर्वाहा
येव लिङस्तत्र शक्तिकल्पनात्। विधिना सामान्यतः कृतिसाध्यत्वे बोधिते अनुमानादिना प्रवर्त्तकस्य तत्तत्का
लीनतत्तत्पुरुषीयकृतिसाध्यताज्ञानस्य संभवात् वस्तुतस्तत्तयद्विशेषयोर्विधायेन सामान्यतः प्रवृत्तौ कृति ति
साध्यताज्ञानत्वेन केवलकृतिसाध्यताज्ञानहेतुत्वस्याप्यावश्यकतया केवलकृतिसाध्यताज्ञानस्यापि प्रव
त्तिजनकतया प्रवर्त्तकज्ञानस्य विधिजन्यत्वनियमनिर्वाहायैव लिङः कृतिसाध्यत्वे शक्तिरावश्यकी त्रिसौ र
तत्र कृतिसाध्यत्वादिज्ञानं चिकीर्षाद्वारा प्रवृत्तिजनकं। प्रवृत्तिजनकमुपायविषयकं ज्ञानं चिकीर्षा स्व
मितिनियमात्। प्रवृत्तिजनकउपायज्ञानव्यभिचारवारणाय प्रवृत्तिजनकमित्तिफलज्ञानेउपादानयत्नन्देचम

भिचारवारणायोपायविषयकमितिउपायत्वंच साध्यतावच्छेदकविषयताशालित्वम् ततो नोक्तस्थले व्यभिचा
न्या॰ कौ॰ रः अतएव मणिकृता चिद्धानस्य कृतौ जनकतायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्तीति ग्रंथेनतथैवोक्तं ॥ अत्र
४३ चिकीर्षातिरिक्तं न कर्त्तव्यमस्तीत्यस्य चिकीर्षाद्वारकत्वमेवार्थं ननु चिकीर्षातिरिक्ताद्वारकत्वं अनुपयो
गात् चिकीर्षाद्वारकत्वसिद्धेश्च चिकीर्षाजनककृतिसाध्यतादिज्ञानस्य प्रवर्त्तकत्वसिद्धिः मिष्टसाधनताज्ञानस्ये
तिसाक्षात्साधनस्योपायविषयस्येत्यर्थं तेन प्रवृत्तिविषयप्रत्यक्षे फलज्ञाने च न व्यभिचारः प्रवृत्तिप्रति
उपादानप्रत्यक्षस्य हेतुत्वात् तत्र व्यभिचारात् साक्षात्साधनत्वएव फलज्ञानस्य प्रवृत्तिहेतुत्वनये तत्र व्यभिचा
रवारणायोपायविषयस्येति विशेषणीयमिति तत्स्याशयः नन्विदमसंगतं चिकीर्षातिरिक्तं न कर्त्तव्यमस्ती
त्यस्य चिकीर्षातिरिक्ताव्यापारकत्वे वा चिकीर्षाऽवश्यंव्यापारइत्यर्थं आद्ये उपादानप्रत्यक्षस्य प्रवृत्तिप्र
क्षा॰ तिसाक्षात्साधनस्य निर्व्यापारतया चिकीर्षातिरिक्ताव्यापारकत्वमस्त्येवेति व्यभिचाराभावात् साक्षात्साधन
स्येतिव्यर्थं द्वितीये फलज्ञानं फलेच्छा इष्टसाधनताज्ञानं चिकीर्षा ततः उपायेच्छा ततः प्रवृत्तिरिति प्रणाल्या
चिकीर्षावश्यंव्यापारो भवत्येवेति तद्वारणाय उपायविषयस्येत्युपादानमनर्थकं फलज्ञानस्य प्रवृत्तिं प्रति
हेतुत्ववादिना चिकीर्षाया अवश्यंव्यापारत्वोपगमात् अत्र उपादानप्रत्यक्षस्य निर्व्यापारकत्वादेव चि राम ४३
कीर्षारूपनियतव्यापारकत्वात्तत्र व्यभिचारवारणाय साक्षात्साधनत्वस्य सार्थक्यसंभवत्येव। तथा चै
कतर[illegible]यमाणे ऽन्यतरपदवैयर्थ्यमेवेति कथमेतदुभयत इत्याशंक्य [illegible] अत्रा
[illegible] चिकी[illegible]ऽवश्यंव्यापार स्वस्वसमानविशेष्यकचिकीर्षाऽवश्यंव्यापार इत्येवार्थः उपादानप्रत्यक्ष
स

[illegible]वनिर्व्यापारकतया चिकीर्षारूपव्यापारकत्वाभावात् साक्षात्साधनस्येति फलज्ञानस्य चिकीर्षाव्या
पारकत्वेपि स्वसमानविशेष्यकचिकीर्षाव्यापारकत्वाभावाद्व्यभिचारवारणाय उपायविषयस्येति सार्थक
मिति। प्रश्च। चिकीर्षातिरिक्ताव्यापारकत्वमेवतदर्थः नवीननैयायिकनये चिकीर्षाविषयसाधनतया उपा
दानप्रत्यक्षस्य उपादानेच्छाव्यापारकत्वोपगमात्। चिकीर्षातिरिक्तउपादानेच्छाव्यापारकत्वात्तत्र व्यभि
चारवारणाय साक्षात्साधनस्येति। न च तस्य उपादानेच्छाव्यापारकत्वे साक्षात्साधनत्वमस्त्येवेति कथं
व्यभिचारवारणमिति वाच्यं उपादानप्रत्यक्षोत्पत्तिकाले प्रवृत्त्यभावेन तस्य स्वातंत्र्येणापि हेतुत्वोपगमात्
इत्थं च तत्तत्कृते साक्षात्साधनत्वे सति तत्तत्कृतिजनकतत्तत्कृत्युपायविषयकज्ञानस्य व्यापकं चिकी त
र्षातिरिक्ततत्तत्कृतिव्यापाराजनकत्वमिति अस्मिन्कल्पे मूलार्थः पूर्वकल्पेन स्वसमानविशेष्यकचिकी
र्षाव्यापारकत्वं तादृशज्ञानत्वव्यापकमिति मूलार्थोऽवसेयः तेन फलस्य कदाचिदुपायत्वेपि न दोषइति
दिति निवर्त्तते॥ तच्चिंत्यं। स्वसमानविशेष्यकत्वप्रवेशे फलज्ञाने व्यभिचारवारणाय विशेषणांतरोपादा
नस्यवैयर्थ्यात्। एवं उपादानप्रत्यक्षस्य उपादानेच्छाव्यापारकत्वे प्रमाणाभावेन न द्वितीयकल्पोप्यसंग
तएवेति। वस्तुतस्तु अनन्यथासिद्धान्वयव्यतिरेकाभ्यामेव कृतिसाध्यत्वादिज्ञानस्य चिकीर्षाद्वारा प्रवृ
त्तिजनकत्वमिति सारं॥ अथ कृतिसाध्यतादिज्ञानस्य चिकीर्षाप्रवृत्त्योर्हेतुत्वे मानाभावः कृतिसाध्यता
चि॰ दिज्ञानकाले चिकीर्षाप्रवृत्त्योर्वारणस्य तत्त्वकृतिसाध्यतादिज्ञानाभावस्य हेतुत्वेनैव निर्वाहात्। नन्वया
यत्स्वकारिके छा सा तत्स्वकारकज्ञानसाध्येति नियमबलात् चिकीर्षा प्रतिकृतिसाध्यताज्ञानस्य हेतुत्व

न्या॰को॰ सिद्धौ चिकीर्षाद्वारा कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिरिति वाच्यं। कृतिसाध्यत्वेन पाकमिच्छा
४४ मीति चिकीर्षानुभावेन तस्याः कृतिसाध्यत्वप्रकारककृतिसाध्यपाकादिक्रियाविशेष्यकेच्छात्वेन
तत्रोक्तयुक्त्या कृतिसाध्यत्वप्रकारकपाकादिविशेष्यज्ञानस्य हेतुत्वसिद्धावपि तत्र बलवदनिष्टाननु
बंधित्वप्रकारकज्ञानस्येष्टसाधनत्वप्रकारकज्ञानस्य च हेतुतायास्तथाप्यसिद्धेरिति चेन्न। कृत्यसा
ध्यताज्ञानाभावादेस्तत्त्वे न तत्र हेतुत्वे तद्व्यतिरेकगौरवापत्त्या कृतिसाध्यताज्ञानादेरेव तत्त्वेन तत्र हे
तुताया उचितत्वात्। किंच जनकीभूतज्ञानविघटकस्यैव ज्ञानस्य प्रतिबंधकत्वमिति नियमबलात्त
त्कृतिसाध्यतादिज्ञानहेतुतासिद्धिः। तादृशनियमार्थस्तु यत्र यस्य प्रतिबंधकज्ञानं तद्वृत्तिजनकज्ञान ज्ञान
ष्टत्वविघटकमिति यथा व्यभिचारज्ञानमनुमितिप्रतिबंधकज्ञानं भवति तत् अनुमितिजनकव्या
प्तिज्ञानविघटकमपि भवतीति एवं च तादृशनियमेन कृत्यसाध्यताज्ञानादेश्चिकीर्षाप्रतिबंधकज्ञा
नत्वेन हेतुता चिकीर्षाजनकज्ञानविघटकत्वसाधने पक्षधर्मताबलात् कृतिसाध्यतादिज्ञानादेरेवं चि
कीर्षाजनकत्वसिद्धिः। यद्यपि जनकज्ञानविघटकत्वमन्यथासिद्धं तथा तद्व्याप्यवस्याहेतुत्वात्स्वरूपा
सिद्धिर्दृष्टान्तासिद्धिश्च तथापि प्रतिबंधकत्वं हि कारणीभूताभावप्रतियोगित्वं किंतु प्रयोजकी
भूताभावप्रतियोगित्वं प्रयोजकत्वं च कारणं तत्कारणसाधारणमिति न दोषः। हेतौ ज्ञानपदोपादा राम
नं च विषयांतरसंचारादौ व्यभिचारवारणाय साध्ये ज्ञानपदं च स्वरूपकथनं न तु साध्यप्रविष्टं प्रयो ४४
जनाभावात्। व्यापकेऽपि विशेषणत्वस्यादोषत्वात्। विघटकत्वं च प्रतिबंधकत्वं। ननु तथापि बाध

नेऽव्याप्ते स व्यभिचारः न च तद्व्यावृत्तप्रतिबंधकता हेतौ निवेशनीयेति वाच्यं। कृत्यसाध्यताज्ञानव्यभिचार
ज्ञानाभावयोरपि बाधाज्ञानवत्त्वे वह्निकीर्षानुमित्योः प्रयोजकतया स्वरूपासिद्धिदृष्टान्तासिद्ध्यापत्ते
रिति चेन्नैवं यादृशज्ञानं संशयनिश्चयसाधारणज्ञानत्वेन यत्र प्रतिबंधकं तत्तज्जनकीभूतज्ञानविघटपदेन
व प्रतिबंधकमिति नियमः बाधसिद्ध्यादेस्संशयसाधारणज्ञानत्वेनाप्रतिबंधकत्वान्न तत्र व्यभिचारः ना
पि सिद्धत्वज्ञानं संशयसाधारणज्ञानत्वेनाप्रतिबंधकं तत्संशयेपीच्छादर्शनादिति न तत्रापि व्यभिचा
रः ननु सिद्धत्वसंशये वह्न्युक्तव्याप्यासाधनेच्छेति सिद्धत्वज्ञानस्य संशयसाधारणज्ञानत्वेन त
त्र प्रतिबंधकत्वान्निश्चयस्याहेतुतया व्याप्तत्वाद्विनिवार्योऽस्त्वेवेति वाच्यं। तथापि बलवदनिष्टान
नुबंधित्वनिश्चयविघटकतया साध्यसत्त्वात्। नन्वेवं कृत्यसाध्यतासंशयोऽपि न प्रतिबंधक इति स्व
रूपासिद्धिरिति वाच्यं। तस्य प्रवृत्तिमात्राप्रतिबंधकत्वेऽपि निष्कंपप्रवृत्तौ तथात्वात्। नन्वेवं निष्कंपप्रवृ
त्तौ तस्य हेतुत्वसिद्धावपि प्रवृत्तिमात्रे हेतुत्वं न सिद्धमिति वाच्यं॥ यद्विशेषयोरिति न्यायेन प्रवृत्ति
सामान्ये तस्य हेतुत्वसिद्धेः। न च तात्पर्यसंशये शाब्दप्रतिबंधके व्यभिचारः मणिकारनये तात्पर्यनि
श्चयस्य शाब्दबुद्धाव हेतुत्वादिति वाच्यं॥ प्रतिबध्यसमानविशेष्यकत्वस्य ज्ञानविशेषणत्वेनादो
षात्। मिश्रास्तु जनकेति मणिप्रतीकमादाय साक्षादविरोधिनः तिशेषः। तेन बाधप्रतिरोधादौ
न व्यभिचारः इत्याहुः। तेषामयमाशयः यत्कार्यं प्रति साक्षादविरोधिनां ज्ञानं तत्र तत्कार्यजनकीभू
तज्ञानवत्वं प्रतिबध्यतीति नियमः तथा च बाधादेः साक्षाद्विरोधित्वाभावादेव हेतुत्वाभावान्न व्य

154

न्या॰ कौ॰ भिचार इति। नन्वेवमपि कृत्स्नसाध्यता[illegible]साक्षाद्विरो[illegible]त्वेन हेतुत्तात् चिकीर्षाजनकज्ञान
विरोधित्वसाधने स्वरूपासिद्धिः परैः कृत्स्नसाध्यताज्ञानस्य चिकीर्षां प्रति साक्षादेव विरोधित्वाङ्गी
कारात् न च तज्ज्ञानातिरिक्तकार्यविरोधित्वमेव साक्षाद्विरोधित्वं॥ तथा च बाधादौ ज्ञानातिरिक्तका
४५ र्यविरोधित्वरूपसाक्षाद्विरोधित्वाभावान्न व्यभिचारः न वा कृत्स्नसाध्यताज्ञाने स्वरूपासिद्धिः। त
ज्ज्ञानातिरिक्ते च्छाविरोधित्वसत्त्वादिति वाच्यं॥ अनैकान्तिकज्ञानवदिति दृष्टांतस्य साधनविकलता
पत्तेः अनैकान्तिकज्ञाने ज्ञानातिरिक्तकार्यविरोधित्वाभावादिति चेदत्रोच्यते। प्रकृतस्य स्वज्ञानस्य
त्यस्य प्रघट्टस्य इत्यर्थः॥ इत्थं च साक्षाद्विरोधिनं प्रति ज्ञानस्य प्रतिबंधकताजनकज्ञानविघटकत्वेनैवे
ति नियमः पर्यवस्यति साक्षाद्विरोधित्वं च स्वविषयविरुद्धविषयावगाहिज्ञानभिन्नत्वं। तथा च प्रकृ
तस्वविषयविरुद्धनिष्ठप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नतत्कार्यप्रतिबध्यतानिरूपित
प्रतिबंधकताकं भवति तज्ज्ञानं तत्कार्यजनकीभूतज्ञानविरोधि भवतीत्येव नियमः। एवं च। बाधा
देर्न व्यभिचारः तत्र स्वविषयविरुद्धप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नप्रतिबध्यतानि
रूपितप्रतिबंधकत्वाभावात्। न वा स्वरूपासिद्धिः कृत्स्नसाध्यताज्ञाने तादृशप्रतिबध्यताभिन्नायाश्चि
कीर्षानिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकताश्रयत्वात्। न वा दृष्टांतस्य साधनवैकल्यं तादृश राम
विरुद्धप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतासत्वात् ४५
[illegible]विषयविरुद्धत्वं च ग्राह्याभावावगाहित्वं ग्राह्याभावव्याप्यावगाहित्वं वा अस्य निष्ठप्रतिबंधकता